णमुत्थुणं समणस्स भगवओ वद्धमाणजिणेसरस्स।

जगत्पूज्य-गुरुदेव-जैनाचार्य-श्रीमद्विजयराजेन्द्रसूरीश्वर-श्रीमद्विजयधनचंद्रसूरीश्वरेभ्यो नमः।

श्रीभूपेन्द्रसूरि-जैनसाहित्य-पुष्पाङ्कः ९

पूर्वसुविहितगीतार्थसंदर्भितम्

ततो जैनाचार्य-श्रीमद्विजयराजेन्द्रसूरीश्वरेण सुबुद्ध्या सशुद्धिसंस्कृतम्

पापबुद्धिनृप-धर्मबुद्धिमन्त्रिणोः पापपुण्यमन्तव्यफलसूचकं।

# ॥ श्रीकामघटकथानकम् ॥

एतत्संशोधका मुनिश्रीगुलाबविजयादिमुनयः

श्रीसौधर्मबृहत्तपोगच्छीय-मरुधरान्तर्गत-सायला-सकलश्रीसंघद्रव्यव्ययेन

प्रकाशयित्री-श्रीभूपेन्द्रसूरि-जैनसाहित्यसमिति मु. पो० आहोर ( मारवाड )

| | | |
|---|---|---|
| श्रीवीरनिर्वाण सं० २४६७ | प्रथमावृत्ती ५०१ | विक्रम सं० १९९८ |
| श्रीराजेन्द्रसूरि सं० ३५ | मूल्यं पठनपाठनम् | इस्वीसन् १९४१ |

# श्रीभूपेन्द्रसूरि जैन साहित्यप्रकाशकसमिति की पुस्तकें।

| | | फार्म संख्या |
|---|---|---|
| १ | सूक्तमुक्तावली–भाषाकवितामय–संस्कृतटीकायुक्त | २९ |
| २ | जिनगुणमंजरी–चैत्यवंदन–स्तुति–स्तवनादिसंग्रह | ११ |
| ३ | श्रीभूपेन्द्रसूरि–जयन्ती–हिन्दीकवितामय | ० |
| ४ | जगवल्लभ स्तवनमाला | १० |
| ५ | सिन्दूरप्रकरण–समूल हिन्दी भाषा युक्त | ८॥ |
| ६ | शांतसुधारस भावना–समूल उत्तम हिन्दी भाषा युक्त | ८ |
| ७ | दृष्टान्तशतक–सटीक | ८ |
| ८ | श्रीचंद्रराजचरित्र–संस्कृतगद्यात्मक | २० |
| ९ | कामघटकथा–गद्यपद्यात्मक | ५ |

मुद्रक–शेठ देवचंद दामजी, आनंद प्रेस–भावनगर

पूर्वमुद्रितस्यैव संशोधितम् ।

ततो जैनाचार्य–श्रीमद्विजयराजेन्द्रसूरीश्वरेण सद्बुद्धिसंस्कृतं

पापबुद्धिनृप–धर्मबुद्धिमन्त्रिणोः पापपुण्यमन्तव्यफलसूचकम् ।

# ॥ श्रीकामघटकथानकम् ॥

ॐनमोऽखिलसिद्धेभ्यः, सद्गुरुभ्यस्तु सर्वदा । जिनास्योत्पन्नभाषायै, ज्ञानदा या सदाङ्गिनाम् ॥ १ ॥

उद्वाहे प्रथमो वरः किल कलाशिल्पादिके यो गुरु–र्भूपश्च प्रथमो यतिः प्रथमकस्तीर्थेश्वरश्चादिमः ।
दानादौ वरपात्रमादिजिनपः सिद्धा यदम्बादिमा, सच्चक्री प्रथमश्च यस्य तनयः सोऽस्त्वादिनाथः श्रिये ॥ २ ॥

इत्थमादौ मंगलाचरणं कृत्वाथ किञ्चिद्धर्ममहिमानं दर्शयति यथा—

धर्मश्चिन्तामणिः श्रेष्ठो, धर्मः कल्पद्रुमः परः । धर्मः कामदुघा धेनुः, धर्मः सर्वफलप्रदः ॥ ३ ॥

धर्मतः सकलमंगलावली, धर्मतः सकलसौख्यसम्पदः । धर्मतः स्फुरति निर्मलं यशो, धर्म एव तदहो ! विधीयताम् ।

धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसंपत्तयः ।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ ५ ॥

व्यसनशतगतानां क्लेशरोगातुराणां, मरणभयहतानां दुःखशोकार्दितानाम् ।
जगति बहुविधानां व्याकुलानां जनानां, शरणमशरणानां नित्यमेको हि धर्मः ॥ ६ ॥

धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः, सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां, तत्किं यन्न करोति ? किं च कुरुते स्वर्गापवर्गावपि ॥७॥

अथात्र धर्मबुद्धिशालिनो मतिसागरनाम्नो मंत्रिणः पापबुद्धिधारिणो जितारिनाम्नो राज्ञश्च स्वस्वमन्तव्यधर्माधर्मविचारे विवादो जातः । अतस्तद्विषयकमिदं कथानकमस्ति—यथाऽस्मिन्नेव दक्षिणभरतक्षेत्रे श्रीपुरनामकं नगरमभूत्तत्कथंभूतं सप्तविंशतिवकारेण युतम् । यतः—

वापीवप्रविहारवर्णवनिता वाग्मी वनं वाटिका, विद्वद्ब्राह्मणवादिवारिविबुधा वेश्या वणिग्वाहिनी ।
विद्यावीरविवेकवित्तविनया वाचंयमो वल्लिका, वस्त्रं वारणवाजिवेसरवराः स्युर्यत्र तत्पत्तनम् ॥ ८ ॥

तत्र जितारिनामा पृथिवीपतिरासीत्परं स नास्तिको जीवाजीवादितत्त्वानि न मन्यते स्मेति सप्तव्यसनादरपरोऽजनि । यथा—

द्यूतश्च मांसश्च सुरा च वेश्या, पापर्द्धिचौरी परदारसेवा । एतानि सप्त व्यसनानि लोके, घोरातिघोरं नरकं नयन्ति

पापतः सर्वं भव्यं भवत्येवंविधो बुद्धिमान् स राजा वर्त्तते, तस्य सम्यक्त्वधारी जीवाजीवादितत्त्वविदास्तिको मतिसागराभिधोऽमात्योऽतीवमान्योऽभूत् । कुतो मंत्रिणं विना राज्यमपि नो फलति शोभते च । यतो नीतिशास्त्रेऽप्युक्तम्—

राज्यं निःसचिवं गतप्रहरणं सैन्यं विनेत्रं मुखं, वर्षा निर्जलदा धनी च कृपणो भोज्यं तथाज्यं विना ।
दुःशीला दयिता सुहृन्निकृतिमान् राजा प्रतापोज्झितः, शिष्यो भक्तिविवर्जितो नहि विना धर्मं नरः शस्यते ॥

अथैकदा राजा मंत्रिणं प्रति वदति स्म-राज्यादिकं समस्तं पापेनैव भवति। तदा मंत्र्याह-भो राजन्नेवं मा ब्रूहि, पापफलन्तु प्रत्यक्षमस्मिन् लोके दृश्यते यतः—

अनाज्यं भोज्यमप्राज्यं, विप्रयोगः प्रियैः सह। अप्रियैः संप्रयोगश्च, सर्वं पापविजृंभितम् ॥ ११ ॥

कुग्रामवासः कुनरेन्द्रसेवा, कुभोजनं क्रोधमुखी च भार्या।
कन्याबहुत्वञ्च दरिद्रभाव, एतान्यधर्मस्य फलानि लोके ॥ १२ ॥

खट्वायां मत्कुणा भूमौ, गृहं च बालकावलिः। अर्केन्धनं यवा भक्ष्याः, पापस्येदं फलं मतम् ॥ १३ ॥

अपि च-यद्दौरूप्यमनाथता विकलता नीचे कुले जन्मता, दारिद्र्यं स्वजनैश्च यः परिभवो मौर्ख्यं परप्रेष्यता।
तृष्णालौल्यमनिर्वृतिः कुशयनं कुस्त्री कुभुक्तं रुजा, सर्वं पापमहीरुहस्य तदिदं व्यक्तं फलं दृश्यते ॥१४ ॥

इत्थमेव पापसूचकं भाषायामपि काव्येनोक्तम्—

पापते जात रसातल मानव पापते अन्ध हुवे नर नारी,
पापते व्याधि रहे अपरंपर पापते भीख भमंत भिखारी।
पापते खान रु पान मिले नही पापते होन है देह खुवारी,
'सूरिदया' तजि पाप पराभय पुण्य करो मन शुद्ध विचारी ॥ १५ ॥

इत्यादिहेतोर्मन्त्री तु धर्मेणैव सर्वं भव्यं भवतीति मन्यते ।

यतः–यन्नागा मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालसा, द्वारे हेमविभूषिताश्च तुरगा हेषन्ति यद्दर्पिताः ।
वीणावेणुमृदंगशंखपटहैः सुप्तश्च यद् बोध्यते, तत्सर्वं सुरलोकदेवसदृशं धर्मस्य विस्फूर्जितम् ॥ १६ ॥

पुना राजानं मंत्र्याह–राज्यादिसुखं निखिलं धर्मेणैव प्रजायते ।

यतः–राज्यं सुसंपदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत्फलं विदुः ॥ १७ ॥

मिलति पुत्रकलत्रसुखप्रदः, प्रियसमागमसौख्यपरंपरा ।
नृपकुले गुरुता विमलं यशो, भवति धर्मतरोः फलमीदृशम् ॥ १८ ॥

अपि च–धर्मो जयति नाऽधर्मो, जिनो जयति नाऽसुरः । क्षमा जयति न क्रोधः, सत्यं जयति नाऽनृतम् १९

इति धर्मेणैव भव्यं भवति न तु पापेन, तथापि राजा न मन्यते स्म प्रत्युत कथयति स्म —हे मंत्रिन्! मत्सकाशाद्धर्मतत्त्वं श्रूयताम्—परलोकगामी शरीरात्पृथक्कश्चन जीवो नास्ति यः परत्र पुण्यापुण्यजन्यं सुखदुःखमनुभविष्यति । शरीरमेवात्मा, पृथिव्यादिचतुष्टयमेव महाभूतं, राजा परमेश्वरः, यावानिन्द्रियगोचरः स एव लोको नापरः, धनार्जनोपायो धर्मः, तद्विरुद्धोऽधर्मः, मृत्युरेव मुक्तिः, अस्मिन् लोके सुखातिशयानुभवः स्वर्गः, दुःखातिशयानुभवो नरकः, प्रत्यक्षमेव प्रमाणं, सुरांगेभ्यो यथा मदशक्तिरुत्पद्यते, तथैव चतुर्भ्यो भूतेभ्यश्चिच्छक्तिर्जायते, तस्माद्ये जना दृष्टं विहायादृष्टं कल्पयन्ति ते मन्दमतिमन्तो मूढा एव ज्ञातव्याः ।

उक्तं च—यावज्जीवेत्सुखं जीवेत्—ऋणं कृत्वा घृतं पिबेत् । भस्मीभूतस्य देहस्य, पुनरागमनं कुतः ? ॥ २० ॥

बौद्धदर्शने च—मृद्वी शय्या प्रातरुत्थाय पेया, मध्ये भक्तं पानकं चापराह्णे ।

द्राक्षा खण्डं शर्करा चार्धरात्रे, मोक्षश्चान्ते शाक्यसिंहेन दृष्टः ॥ २१ ॥

इति राजवाक्यं निशम्य मंत्री प्रत्युवाच—हे महाराज ! नैतदुक्तं युज्यते, सर्वप्रमाणसिद्ध आत्मा नापलापयितुं शक्यः । यदि च लोकांतरगामी आत्मा न सिद्ध्येत्तदैव ‘ यावज्जीवेत्सुखं जीवेत् ’ इति भवदुक्तं संगच्छेत। अत आत्मसिद्धिस्तावदाकर्ण्यताम्— ‘ अहं सुखी अहं दुःखी ’ इति प्रत्यययोगत आत्मा शरीरादिव्यतिरिक्तः प्रतीयते, शरीरादिसंघातानां जडत्वाच्च तादृक्प्रतीतिस्तत्र घटते । किंच—‘ अहं घटं वेद्मि ’ एतस्मिन् वाक्ये कर्ता कर्म क्रिया चेति त्रितयं प्रतिभासते, तत्र कर्मक्रिये स्वीकृत्य कुतः कर्ता प्रतिषिध्यते ? । जडे शरीरे कर्तृत्वमेव न संभवति, भूतचैतन्ययोगात्तत्र चैतन्यमस्तीति चेदसंगतं । ‘ मया दृष्टं श्रुतं स्पृष्टं घ्रातं ज्ञातं स्मृतं भुक्तं पीतमास्वादितम् ’ इत्येककर्तृका भावा भूतचिद्वादे न संगच्छन्ते चेतनबहुत्वप्रसंगात् । गवादीनां वत्सः पूर्वं स्वयमेव स्तन्यपानार्थमुत्तिष्ठति, तदपि जन्मान्तरानुभवं विना न संगच्छते, तेन सिद्धमात्मनो लोकान्तरगमनं, लोकान्तरगमनसिद्ध्या शुभाशुभकर्मबन्धोऽपि सिद्धः । कर्मवैचित्र्यात्स्वभाववैचित्र्यमपि घटते, तस्मात्तुरंगेभ्यो मदशक्तिरिवेति भूतचिद्वादो निराकृतः । न प्रत्यक्षप्रमाणेनैवाऽप्रत्यक्षा अपि सहस्रशः पदार्था अवगन्तुं शक्यास्तस्मादनुमानमपि प्रमाणं धूमादिलिंगदर्शनेन पर्वतादिगतं ज्वलनादि लिंगिनमनुमातुं प्रामाणिकैरभ्युपगम्यत एव । तेनादृष्टानामपि पदार्थानां सिद्धौ सत्यां नाऽयं नास्तिकवादः प्रमाणपदवीमधिरोहति,

ततस्त्याज्य एव सः। इति मंत्रिणोक्तं निशम्यापि राज्ञा स्वकदाग्रहो न मुक्तस्तेन राज्ञः पापबुद्धिरिति लोके नाम जातं मंत्रिणस्तु धर्मबुद्धिरिति। ततस्तयोः सर्वदा पुण्यपापविषये विवादो भवति स्म। पुनर्मंत्री तु तं धर्मात्मानं विधातुं तेन नृपेण सह नित्यमेव विवदते स्म।

यतः–यात्रार्थं भोजनं येषां, दानार्थं च धनार्जनम्। धर्मार्थं जीवितं येषां, ते नराः स्वर्गगामिनः ॥ २२ ॥

अथैकदा हास्ययुक्तवचनेन राज्ञोक्तम्–भो मंत्रिन्! त्वं बहुसारं पुण्यं मन्यसे, तर्हि तव स्वल्पैव लक्ष्मीः कथं? पुनर्मम पापादेव राज्यादिसुखं कथं जातम्? एतन्निशम्य मंत्रिणा चिन्तितं रुत्वेष जडमतिः, अहह! यो यस्य शुभाशुभस्वभावः पतितः स तं कथमपि नैव मुंचति।

यतः–कर्पूरधूल्या रचितस्थलोऽपि, कस्तूरिकाकल्पितमूलभागः।
हेमोदकुंभैः परिषिच्यमानः, पूर्वान् गुणान्मुंचति नो पलाण्डुः ॥ २३ ॥

माधुर्यं चेक्षुखंडे जगति सुरभिता चंपकस्य प्रसूने, शैत्यं श्रीखंडखंडे भ्रमरपरिकरे चातुरी राजहंसे।
रागः पूगीफलानाममितगुणवतां नागवल्लीदलानां, सद्वृत्त्या चारु शीलं कथमपि कथितं केन कस्योपदेशः?

अपि च–शर्करासर्पिषा युक्तः, निम्बबीजः प्रतिष्ठितः। क्षीरघटसहस्रैश्च, निंबः किं मधुरायते? ॥ २५ ॥

ततो राज्ञोक्तं यदहं युद्धवधादिकं पापं करोमि तेन मे द्रव्यजान्तःपुरभाण्डागारादिवृद्धिश्च, पुण्यं कुर्वाणस्यापि ते गृहे मत्समं द्रव्यादिकं नैव वर्तते, यत्किमप्यस्ति तदपि समस्तं मयैव समर्पितम्। न च ते पुण्यफलं, अतो धर्मस्य किमपि माहात्म्यं नास्ति, मम

भवे तु पापेनैव भव्यं भवति । यदि त्वं धर्मप्रभावं मन्यसे, तर्हि त्वं धनं विनैकाक्येतादृशे देशान्तरे गत्वा धर्मप्रभावादेव धनमर्ज-यित्वा त्वरितमागच्छ ।

यतः—तत्र देशे हि गन्तव्यं, स्वकीयं यत्र नो भवेत् । प्रतोल्यां भ्रमतो नित्यं, वार्तां कोऽपि न पृच्छति ॥२६॥

तदाहं ते धर्मफलं वेद्मि नान्यथा, ततः साहसिकेन परोपकारिणा मंत्रिणोक्तमेवमस्तु ।

यतः—साहसी लभते लक्ष्मीं, कातरो न कदाचन । श्रुतौ हि कुंडलं भाति, नेत्रे भाति हि कज्जलम् ॥ २७ ॥

अपि च—उद्यमः साहसं धैर्यं, बलं बुद्धिः पराक्रमः । षडेते यस्य विद्यन्ते, तस्माद्देवोऽपि शंकते ॥ २८ ॥

एवमुक्त्वा मंत्री देशान्तरं चचाल । अथ विषममार्गं गच्छतोऽन्यदा रात्रावटव्यामागतस्य तस्य पुरतः क्षुधाकुलः सप्तधि अभी-त्यारटन्नेको निशाचरो मिलितः । तदा मंत्रिणा स्वोत्पातबुद्ध्या तस्य दृष्टमात्रस्यैवोच्चस्वरैः फूत्कारः कृतः । हे मातुल ! तुभ्यं मे नमस्कृतिरस्तु, एवं मंत्रिणोक्तस्स कथयति स्म—हे सुनर ! स्वेच्छया त्वं मातुलो मातुल इति मां मा ब्रूहि, यदि पुनर्वक्ष्यस्येव तथाप्यहं त्वामवश्यमेव भक्षयिष्यामि, यतोऽद्याहं सप्तभिर्दिवसैर्बुभुक्षितोऽस्मि । अतः साम्प्रतं धर्माधर्मदयादिविवेकविकलो यथातथा निजोदरं पूरयिष्यामेव ।

तदुक्तं च—बुभुक्षितः किं न करोति पापं ?, क्षीणा नरा निष्करुणा भवन्ति ।
आख्याहि भद्रे ! प्रियदर्शनस्य, न गंगदत्तः पुनरेति कूपम् ॥ २९ ॥ तथा च—

लज्जामुज्झति सेवते च कुजनं दीनं वचो भाषते, कृत्याकृत्यविवेकमाश्रयति नो नो प्रेक्षते स्वां रतिम् ।
भण्डत्वं विदधाति नर्तनकलाभ्यासं समभ्यस्यति, कुष्पूरोदरपूरणव्यतिकरे किं किं न कुर्याज्जनः ? ॥ ३० ॥

अतस्त्वां सर्वथा नैव मुंचामि भक्षयिष्याम्येव । इत्याकर्ण्य पुनर्मन्त्री कथयति स्म—हे मातुल ! एतावत्प्रसादं कुरु, सांप्रतं मे महत्कार्यमस्ति तदर्थमग्रे जिगमिषामि, तत्कृत्वा प्रत्यागच्छन्नहं तव क्षुधोपशमं करिष्यामि, अहो विवेकिन् ! मां मुंच मुंच । पश्चादः कथयति स्म—हे मानव ! कृष्णशिरसो मायाविनो नरस्य तव को विश्वासः ?, ततः कथं मरणायात्रैव त्वं मत्पार्श्वे समागच्छेः । मंत्रिणोक्तम्-यद्यहं नागच्छामि, तर्हीमानि पातकानि मे भवन्तु । तानि यथा—भर्तृसंगं विहाय या स्त्री गर्भपातं करोति तस्या यत्पातकं तन्मां स्पृशतु, एवमेव व्रतान्यंगीकृत्य पुनस्तद्भञ्जकस्य, यः पितरावनगणयति गुरुं चापह्नुते तस्य, विश्वासमुत्पाद्य तद्विश्वासघातकस्य, धर्मस्थाने पापपरायणस्य, वनदाहकस्य, अष्टादशपापस्थानाचरितुः, भ्रातृस्वसृमुनीनां घातकस्य, सप्तव्यसनसेविनोऽनृतव्यवहारपरायणस्य, तथा बालधेनुस्त्रीविप्राणां निहन्तुः, स्वगोत्रस्त्रियं यः सेवते तस्य, षट्पदीजिक्षादिक्षुद्रजन्तूनां हिंसकस्य, धर्मनिषेधकस्य, धर्मी भूत्वा चौर्येण जगद्वञ्चकस्य, कृतघ्नस्य, अन्येषां प्राणिनां कुमार्गयोजकस्य, गुरुदेवज्ञानद्रव्याणां भक्षकस्य, पूजनीयगुर्वादीनां पराभवकर्तुश्चेत्यादीनां यानि जगति महान्ति पातकानि तानि सर्वाणि चेदहं नायामि तर्हि मां स्पृशन्तु । एवमुक्तरूपं मंत्रिवाचं श्रुत्वा विश्वस्तेन तेनापि तस्य मंत्रिणः पुण्यप्रभावाद् गमनाज्ञा दत्ता, ततः समासाद्याज्ञां सहर्षोऽग्रे मंत्री प्रचलत् । अथ मार्गे गच्छता तेन कस्यांश्चिन्नगरासन्नवनवाटिकायां श्रीऋषभदेवस्वामिप्रासादो दृष्टः । तत्र गत्वातिभावनापूर्विकां विध्युपेतां जिनेश-

रपूजां विधायाविहृष्टसन् स्वहृदयोद्भवसद्भावेन वीतरागगुणवर्णनस्तुतिं पठति स्म ।

तद्यथा–अमोघा वासरे विद्यु–दमोघं निशि गर्जितम् । अमोघं साधुवाक्यं च, ह्यमोघं देवदर्शनम् ॥ ३१ ॥

अपि च–धन्यानां ते नरा धन्या, ये जिनेन्द्रमुखाम्बुजम् ! निर्विकारं मनोहारि, पश्यन्ति दिवसोदये ॥ ३२ ॥

पुनर्ये नराः शास्त्रोक्तद्रव्यभावपूजाविधिना जिनेन्द्रपूजां कुर्वन्ति तेषामीदृशं फलं भवति । तथाहि—

वस्त्रैर्वस्त्रविभूतयः शुचितरालंकारतोऽलंकृतिः, पुष्पैः पूज्यपदं सुगन्धितनुता गन्धैर्जिने पूजिते ।
दीपैर्ज्ञानमनावृतं निरुपमा भोगर्द्धिरत्नादिभिः, सम्पद्येतानि किमद्भुतं शिवपदप्राप्तिस्ततो देहिनाम् ३३

न यान्ति दास्यं न दरिद्रभावं, न प्रेष्यतां नैव च हीनयोनिम् ।
न चापि वैकल्यमथेन्द्रियाणां, ये कारयन्त्यत्र जिनेन्द्रपूजाम् ॥ ३४ ॥

देव ! त्वं दुःखदावाग्नि–तप्तानामिह वारिदः । मोहान्धकारमूढाना–मेकदीपस्त्वमेव हि ॥ ३५ ॥

आयुष्यं यदि सागरोपममितं व्याधिव्ययावर्जितं, पाण्डित्यं च समस्तवस्तुविषयं प्राचीण्यलब्धास्पदम् ।
जिह्वा कोटिमिता च पाटवयुता स्यान्मे धरित्रीतले, नो शक्नोमि तथापि वर्णितुमलं तीर्थेशपूजाफलम् ३६

मिथ्याम्बुलहरीधूतं, निमज्जन्तं भवार्णवे । कुग्राहग्रसितं नाथ !, मामुत्तारय तारय ॥ ३७ ॥

जन्ममृत्युजरारोग–शोकसन्तापवैरिणः । पृष्ठतो धावतो देव !, मयि वारय वारय ॥ ३८ ॥

ऊर्ध्वं त्रैभुवनं चतुर्गतिभवं हन्तुं कषायादिकान्, विच्छेत्तुं विकथां चतुर्विधसुरप्रीतिं च कर्तुं तथा ।
वक्तुं धर्मचतुष्टयं रचयितुं संघं चतुर्धा ध्रुवं, व्याख्यानावसरे चतुर्विधकृताऽऽवक्त्रो जिनः पातु वः॥३९॥
अपि च–चिन्तामणिं न गणयामि न कल्पयामि, कल्पद्रुमं मनसि कामगवीं न वीक्षे ।
ध्यायामि नो निधिमनर्घ्यगुणातिरेक–माद्यं जिनेश्वरमहर्निशमेव सेवे ॥ ४० ॥
इत्यादिस्तुत्या प्रमुदितः प्रतिहारक्षः कपर्दियक्षः प्रत्यक्षो बभूव । तेन जिनभक्तिस्तुतिसन्तुष्टेन बहिर्गत्वा मंत्रिणे कामघटः समर्पितः । तदा मंत्रिणोक्तम्—भो यक्षेन्द्र ! अहमेनं घटं कथं गृह्णामि कुत्र वा स्थापयामि ? अनेन समीपस्थेन पुरुषस्य लज्जा स्यात् । ततो देवेनोक्तमनुत्पादित एवाऽदृष्टस्स्वयं घटस्तव पृष्ठे समागमिष्यति, पुनस्तेऽयं मनोवांछितार्थं पूरयिष्यति । एतन्मंत्रिणापि स्वीकृतं, ततः स मंत्री कृतकृत्यस्सन् कामकुंभं लात्वा स्वनगरं प्रति चलितो मार्गे विचारयति स्म—ममेदं धर्मस्य माहात्म्यं, धर्मेण विना नरोऽपि न शोभते, यथेष्टं च कार्यं किमपि न स्यात् ।
यतः–निर्दन्तः करटी हयो गतजवश्चन्द्रं विना शर्वरी, निर्गन्धं कुसुमं सरो गतजलं छायाविहीनस्तरुः ।
भोज्यं निर्लवणं सुतो गतगुणश्चारित्रहीनो यतिः, निर्द्रव्यं भवनं न राजति तथा धर्मं विना मानवः ४१
पुनर्यत्र धर्मी नरो गच्छति तत्र सर्वत्र वृक्षो लताभिरिव समृद्धिवल्लीभिर्वेष्ट्यते ।
यतः–पुंसां शिरोमणीयन्ते, धर्मार्जनपरा नराः । आश्रीयन्ते च संपद्भि–र्लताभिरिव पादपाः ॥ ४२ ॥

अथाग्रे चलन्मंत्री तस्यामेवाटव्यां समागतः। गच्छन्मनसि चिन्तयति स्म—अहो ! सैवाटवी समागता, सोऽथ पलादो मां मिलिष्यति मत्प्रतिज्ञानुकूलं च मां भक्षयिष्यति कोऽत्र मे शरणं ? पूर्वपुण्यं विना। यतः-

घने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा। सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुरा कृतानि

इतश्चाग्रे पलादोऽपि मिलितः, तदैव तेनोक्तम्-हे पुरुषोत्तम ! स्वोक्तवचनमथ पालय।

यतः-संसारस्य त्वसारस्य, वाचा सारा हि देहिनाम्। वाचा विचलिता यस्य, सुकृतं तेन हारितम्॥ ४४॥

मंत्रिणोक्तं तथाऽस्तु पालयिष्यामि परं किमनेन मेऽशुचिशरीरेण भक्षितेन ?।

यतः-रसासृग्मांसमेदोऽस्थि-मज्जाशुक्राणि धातवः। सप्तैव दश चैकेषां, रोमत्वक्स्नायुभिः सह॥ ४५॥

अमेध्यपूर्णे कृमिजालसंकुले, स्वभावदुर्गन्ध अशौचनिह्नवे।
कलेवरे मूत्रपुरीषभाजने, रमन्ति मूढा विरमन्ति पण्डिताः॥ ४६॥

अजिनपटलगूढं पिंजरं कीकसानां, यमवदननिषण्णं रोगभोगीन्द्रगेहम्।
कुणपकुणपिगन्धैः पूरितं बाढगाढं, कथमिव मनुजानां प्रीतये स्याच्छरीरम् ?॥ ४७॥

पुनरमात्येनोक्तम्-हे पलाद ! मच्छरीरभक्षणेन तव कार्यं सरसरसवत्या वा ? तेनोक्तम् तर्हि-सरसां रसवतीं देहि, तदा तेन मंत्रिणा कामघटप्रभावेण यथेष्टामपूर्वां रसवतीं तस्मै दत्त्वा दिव्याहारो भोजितः। ततः सन्तुष्टेन पलादेनोक्तम्—एवंविधा

रसवती त्वया कुतो दत्ता ? तदा धर्मिणाऽसत्यभाषणभीरुणा मंत्रिणा सत्यमेवोक्तं कामघटप्रभावेणेति । यतः-

सत्यवाचि विभवः पदे पदे, सत्यवाचि सुहृदः पदे पदे । सत्यवाचि सुयशः पदे पदे, सत्यवाचि सुखमेव सर्वतः ॥

ततो राक्षसेन कामघटो याचितस्तदा मंत्रिणोक्तम्—एवंविधं कामघटमहं कथं तवार्पयामि ? तेनोक्तम्-यदि त्वमर्पयिष्यसि तदाऽहमतःपरं हिंसां न करिष्यामि, तत्र च महत्पुण्यं भविष्यति । अहमपि तत्प्रतिफले सकलकार्यकरं रिपुशस्त्रनिवारकं देवताधिष्ठितं सर्वोत्तमं दण्डमर्पयिष्यामि, अतस्त्वं मे कामघटं समर्पय । मंत्रिणोक्तमहं समर्पयामि, तथापि तवाधर्मेण स सर्वथा न स्थास्यति।

यतः-चिन्तामणिः कामकुम्भः, सुरभिः सुरपादपः । कनकं रजतं तिष्ठेत्, नैव पापिनिकेतने ॥ ४९ ॥

तदा निशाचरेणोक्तम्-अहं सम्यक् प्रयत्नेनैनं स्थापयिष्यामि, इत्युक्ते मंत्रिणा दण्डप्रभावं स्वोपयोगिनं ज्ञात्वा चिन्तितं स्वमनसि-यद्यहमस्य प्रार्थनाभंगं विधास्ये तर्हि मे सर्वतो नीचत्वमापत्स्यते ।

यतः-तण लहुयं तुस लहुयं, तणतुसमज्झे वि पत्थणा लहुयं । ताहं चिय कुण लहुयं, पत्थणभंगो कओ जेण ॥ ५०

इति विचिन्त्य स तं घटं तस्मै समर्पयित्वा तद्दत्तं दंडं गृहीत्वाऽग्रे चचाल । अथ तस्य मंत्रिणो गच्छतो द्वितीयदिवसे बुभुक्षा लग्ना, तदा तेन दंडो लपितः—हे दंड ! त्वं मे भोजनं दास्यसि नवा ? तेनोक्तम्-भोजनदाने मे सामर्थ्यं नास्ति । अथैवं क्षुत्पीडायामाहारनिषेधवार्तां श्रुत्वाऽतिचिन्तातुरो मंत्री तमुवाच-एवं मा वद मम सर्वेन्द्रियक्षयकरी क्षुधा लग्नास्ति, यत्कथितं पूर्वसूरिभिस्तद्यथा—

अथैवं क्षुत्पीडायामाहारनिषेधवार्तां श्रुत्वाऽभचिन्तातुरो मंत्री तमुवाच—एवं मा वद, सर्वोदन्तक्षयकरी क्षुधा मे लग्नास्ति, यत्कथितं पूर्वसूरिभिस्तद्यथा—

आदौ रूपविनाशिनी कृशकरी कामाग्निविध्वंसिनी, प्रज्ञामंदकरी तपःक्षयकरी धर्मस्य निर्मूलनी ।
पुत्रभ्रातृकलत्रभेदनकरी लज्जा कुलच्छेदिनी, सा मां पीडति सर्वदोषजननी प्राणापहारी क्षुधा ॥ ५१ ॥
मानं मुञ्चति गौरवं परिहरत्यायाति दीनात्मतां, लज्जामुत्सृजति श्रयत्यदयतां नीचत्वमालम्बते ।
भार्याबन्धुसुहृत्सुतेष्वसुकृती नानाविधं चेष्टते, किं किं यन्न करोति निन्दितमपि प्राणी क्षुधापीडितः ॥५२॥
किं किं न कयं को न पुच्छिओ, कह कह न नामिअं सीसं । दुब्भरउअरस्स कए, किं न कयं किं न कायव्वं ।
प्रहरे दिवसे जाते, क्षुधा संबाधते तनुम् । धैर्यकार्यविनाशः स्या—त्त्वां विना म्रियतेऽशन ! ॥ ५४ ॥
अपि च—जीवंति खग्गछिन्ना, अहिमुहपडिया वि केवि जीवंति । जीवंति जलहिपडिआ, खुहाछिन्ना न जीवंति

मंत्रिवाक्यमेवं निशम्य दंडोऽवदत्—अन्यत्किमपि कार्यं कथय तदहं करिष्यामि, तर्हि कामघटमानयेति मन्त्रिणोक्ते समानयामीत्युक्त्वाऽऽकाशमार्गेण दंडश्चचाल, गतस्तत्र यत्र राक्षसः । तं कुट्टयित्वा द्वारं भंक्त्वा कामघटं च गृहीत्वा स मंत्रिसमीपे समागतः । मंत्रिणाथ स कामघट आभाषितस्त्वं तत्र किं समाधिना स्थितः ? घटेनोक्तं क्व मे समाधिः ? कुतस्त्वं मां तस्मै अधर्मिणेऽदाः । तेन नाममात्रमपि मे सुखं कथं भवेत् ? मम तु धर्मवतामेव समीपे समाधिर्नान्यत्र । लोकेऽपि सदृशेषु सदृशा एव समानन्दन्ति ।

यतः-हंसा रमंति सरे, भमरा रमंति केतकीकुसुमे । चंदणवणे भुयंगा, सरिसा सरिसेहिं रमंति ।।५६।।

अतस्तत्पापिपार्श्वे लेशमात्रमपि समाधिर्मे नो जातः । ततस्तेनातिक्षुधाकुलाय मंत्रिणे मनोऽभीप्सितं भोजनं दत्तं ततस्ते द्वे वस्तुनी लात्वा सचिवोऽग्रे चचाल । अथाऽस्मिन्नवसरे पूर्वदेशीय एकः श्रेष्ठिवर्यो महालाभमधिगम्य लक्षसंख्यामितं जनसंघं संमील्य शत्रुञ्जयादिपंचतीर्थयात्राकरणाय तेन संघेन साकं निस्ससार । स संघलोको मार्गग्रामस्थतीर्थानि समभिवन्दमानोऽनुक्रमेण शत्रुञ्जयं समागात् । तत्र ऋषभजिनस्य गिरनारे नेमिजिनस्य चाष्टाह्निकमहोत्सवेन पूजाभक्तिभिः सधर्मिवात्सल्यैर्मुनिभ्यो बहुतरैर्दानसम्मानैश्च सम्यग् जैनशासनोन्नतिं विधाय स्वजन्मसाफल्यं मन्यमानः शास्त्रवर्णिततीर्थयात्राफलभावनां भावयमानस्तीर्थं तुष्टाव ।

यतः-आरम्भाणां निवृत्तिर्द्रविणसफलता संघवात्सल्यमुच्चै-र्नैर्मल्यं दर्शनस्य प्रणयिजनहितं जीर्णचैत्यादिकृत्यं ।
तीर्थोन्नत्यं नितान्तं जिनवचनकृतिस्तीर्थसत्कर्मकृत्यं, सिद्धेरासन्नभावः सुरनरपदवी तीर्थयात्राफलानि ५७

छट्ठेणं भत्तेणं, अपाणएणं तु सत्तजत्ता य । जो कुणइ सत्तुंजए, सो तइए भवे लहइ सिद्धिं ।। ५८ ।।

श्रीतीर्थपांथरजसा विरजीभवन्ति, तीर्थेषु बंभ्रमणतो न भवे भ्रमन्ति ।
तीर्थव्ययादिह नराः स्थिरसंपदः स्युः, पूज्या भवन्ति जगदीशमथार्चयन्तः ।। ५९ ।।

जाएण वि किं तेण, अहवा किं तेण मणुअजम्मेण । सत्तुंजयो न दिट्ठो, न वंदिओ जेण रिसहजिणो ।।६०।।

अपि च-नमस्कारसमो मंत्रः, शत्रुञ्जयसमो गिरिः । वीतरागसमो देवो, न भूतो न भविष्यति ।। ६१ ।।

एवं स श्रीसंघस्तीर्थस्तवनं विधाय शुद्धभावनां च विभाव्य तदनन्तरं ततो निवर्त्तमानो मार्गे एकस्य मार्गस्थग्रामस्य समीपे स्थितः। अस्मिन् समये तेन मंत्रिणा गच्छता स एव संघो मार्गे विलोकितो, विलोक्य चातीव हृष्टेन तेन जयजिनेन्द्रेतिभगवन्नाम-निगदनपूर्वकं नमस्कारं विधाय तेन संघेन सह क्षेमकुशलादिवार्तालापो विहितः। ततस्तेन मंत्रिणा शास्त्रविचारदृष्ट्या महालाभं बुध्वा स्वपार्श्वस्थं कामघटानुभावं विदित्वा च शुद्धभावनयादिबहुमानेन सहर्षभरेण स्वामिवात्सल्याय संघो निमंत्रितः। कुतः शास्त्रे संघभक्तिफलमेवमुक्तम्—

कदा किल भविष्यन्ति, मद्गृहांगणभूमयः। श्रीसंघचरणाम्भोज-रजोराजिपवित्रिताः॥ ६२॥

रुचिरकनकधाराः प्रांगणे तस्य पेतुः, प्रवरमणिनिधानं तद्गृहान्तःप्रविष्टम्।
अमरतरुलतानामुद्गमस्तस्य गेहे, भवनमिह सहर्षं यस्य पस्पर्श संघः॥ ६३॥

प्राप्तं जन्मफलं जने निजकुलाचारः प्रकाशीकृतः, पुण्यं स्वीकृतमर्जितं शुचियशः शुभ्रा गुणाः ख्यापिताः।
दत्ता दुःखजलाञ्जलिः शिवपुरद्वारं समुद्घाटितं, यैः सिद्धान्तनयेन शुद्धमनसा श्रीसंघपूजा कृता॥ ६४॥

तथा च—कल्पद्रुमस्तस्य गृहेऽवतीर्ण–श्चिन्तामणिस्तस्य गृहे लुलोठ।
त्रैलोक्यलक्ष्मीरपि तं वृणीते, गृहांगणं यस्य पुनाति संघः॥ ६५॥ कथंभूतः स श्रीसंघो यथा—

रत्नानामिव रोहणः क्षितिधरः खं तारकाणामिव, स्वर्गः कल्पमहीरुहामिव सरः पंकेरुहाणामिव।

पाथोधिः पयसां शशीव महसां स्थानं गुणानामसा–वित्यालोच्य विरच्यतां भगवतः संघस्य पूजाविधिः ६६

परं तमेकाकिनं दृष्ट्वा सनिमंत्रणा तैस्संघलोकैर्न मानिता, रन्धनं च प्रारब्धं किमेकाकिनो निःस्वस्य निमंत्रणेनेति ।

यतः–ब्रह्मचारी मिताहारी, विनिद्रः शून्यमानसः । निःसंगो निष्परीवारी, भाति योगीव निर्धनः ॥ ६७ ॥

एवं संघलोकानां वार्तामवगत्य ततो मंत्रिणापि जलघटं गृहीत्वा संघमध्यस्थचुल्लिकेषु वारि निक्षिप्तं, उक्तं चाद्य केनापि रन्धयित्वा न भोज्यं, तथाविधमसमंजसं दृष्ट्वा व्याकुलीभूताः संघपत्यादयो जनास्संभूय चिन्तयन्ति स्म ।

यतः–सुजीर्णमन्नं सुविचक्षणः सुतः, सुशासिता स्त्री नृपतिः सुसेवितः ।
विचिन्त्य चोक्तं सुविचार्य यत्कृतं, सुदीर्घकालेऽपि न याति विक्रियाम् ॥ ६८ ॥

अपि च–ग्रंथमेको द्वयोर्मन्त्रं, त्रिभिर्गीतं चतुष्पथम् । कृषिं च पंचभिः कुर्या–द्विचारं बहुभिः सह ॥ ६९ ॥

अतोऽद्य वयं सर्वे किं करिष्यामः ? एष तु स्वोदरपूर्णकरणेऽप्यसमर्थः, पुनरस्माकमपि रन्धनं प्रतिषेधति । ततस्तन्मध्यात्कैश्चिद् वृद्धैरुक्तं, भोः संघपत्यादिलोकाः ! अस्याप्याग्रहकारकस्याशाभंगो न विधेयो भवद्भिरद्यैवमेव भवत्वेष यत्स्वशक्त्या लवंगपूगीफल-जलादिकमपि दास्यति तदेव खादित्वा वयं सर्वे स्थास्यामः । किंपरं कुर्मः ? अतो दातव्याज्ञा युष्माभिः, एवंविधं वृद्धवाक्यं श्रुत्वा संघपतिराज्ञां तस्मै ददौ । आज्ञामादाय हर्षेणागतो मंत्री स्वाश्रये पूजादिशुभकार्येष्वनुरक्तो बभूव । संघजनानामाह्वानं बहुवेला-पर्यन्तं न कृतं, तेन सर्वे उद्विग्नमनसः सन्तो विचारसमुद्रे निमग्नाः किमद्यैष भोजनं दास्यति नवेति ? । इतो मंत्रिणाप्यागत्य सादरं संघ आकारितः, संघोऽपि संदेहदोलारूढः सन् तदुक्तस्थानेऽटव्यां चचाल । अग्रे गच्छन् दुकूलमयं रमणीयं मंडपं दूरतो

दृष्ट्वा हृष्टो विस्मितश्च । परस्परं जनाः पृच्छन्ति स्म—किमिदं मंडपं स्वर्गविमानं सत्यमसत्यं वा दृष्टिभ्रमो वा मृगतृष्णेन्द्रजालरजनीस्वप्नदिव्यव्यतिकरवद् दृश्यते वा किमिदं ? एवंविधं विचारं कुर्वन्तः सर्वे गतास्तत्र गमनानन्तरं हस्तेन मंडपं विलोकयन्ति स्म । इतः प्रधानोऽपि तान् यथायोग्यस्थाने समुपावेशयत् । ततो घटप्रभावेण स्वर्णस्थालानि मंडितानि चाऽष्टोत्तरशतसंख्यामिताभिः षोडशशृंगारवतीभिः सुरांगनाभिः फलाद्यनुक्रमेण दिव्या रसवती परिवेषिता । तदाश्चर्यकारकं समस्तं वस्तु विलोक्य ते सर्वे जनाः परस्परं पृच्छन्ति स्म । ईदृशानि सुस्वादूनि फलानीदृशी पक्वान्नरसवती च केनचित् क्वापि कदापि दृष्टाऽऽस्वादिता वा ? अपरैरुक्तं न क्वापि । भोजनानन्तरं तेनोद्गमनीयोचरासंगोष्णीषकुण्डलकेयूरस्वर्णप्रालम्बिकाः सकलश्रीसंघः परिधापितः । अथ चमत्कारपूरितेन संघपतिना पृष्टं ? भोः पुरुषोत्तम ! त्वयैतावत्कस्य बलेन कृतं ?, तदाऽमात्येनोक्तं कामघटबलेन । मंत्रिणोक्तकामघटप्रभावं निशम्य लोभाभिभूतेन संघपतिनोक्तं—यदि मह्यं कामघटमर्पयिष्यसि तर्हि सर्वदा साधर्मिकवात्सल्यपुण्यं ते भविष्यति, त्वन्तु धर्मार्थी दृश्यसे ।

यतः—लक्ष्मीः परोपकाराय, विवेकाय सरस्वती । सन्ततिः परलोकाय, भवेद्धन्यस्य कस्यचित् ॥ ७० ॥

अपरं मे सर्वरोगविषशस्त्रघाताद्युपद्रवनिवारकं चामरयुगलं त्वं गृहाण, कामघटं मह्यं समर्पय, कुतो महतामपि लोभो दुर्जयः ।

यतः—दीसंति खमावंता, नीहंकारा पुणो वि दीसंति । निल्लोहा पुण विरला, दीसंति न चेव दीसंति ॥७१॥

संघपतेरेवं वचनं निशम्य मंत्रिणोक्तम्—संतुष्टेन देवेन यो यस्याऽर्पितो भवति तत्रैव स तिष्ठति, नाऽन्यत्र । तदा कामघटार्थी संघपतिः कथयति स्म त्वन्तु सकृदर्पय तिष्ठतु वा मा तिष्ठतु । ततो मंत्रिणा तस्याऽत्याग्रहं विलोक्य तच्चामरयुगलं गृहीत्वा स्वकामघटः समर्पितः । तदनुहृष्टः सन् संघपतिर्मंत्री च स्वं स्वं स्थानं प्रति चलितौ ।

अथ द्वितीयदिवसे बुभुक्षितो मंत्री दण्डं प्रति वक्ति स्म—भो दंड ! सर्वतोऽप्यशुभाऽसह्यवेदनाकारी क्षुधा मां बाधते ।
उक्तं च-क्षुधे रण्डे ! प्रयासि त्वं, मातर्भ्रातर्भगिन्यये ! । यद्धिक्कृतं हतं लोके, स्वस्थानं त्यानयस्यहो ! ॥७२॥
अपि च-गीतं नादविनोदपण्डितगुणाः श्रीखंडकांताधरा, अश्वस्यन्दननागभोगभवनं कर्पूरकस्तूरिके ।
रामारंगविनोदकाव्यकरणं कामाभिलाषाऽपि च, सर्वे ते हि पतन्ति कन्दरदरे ह्यन्नं विना सर्वथा ७३
अतो मह्यं भोजनं देहि, दंडेनोक्तं—ममैतन्न सामर्थ्यं, यदि त्वं वदेस्तर्हि भोजनदं कामघटमानयामीत्युक्ते मंत्री मौन एव स्थितः । ततो दंडः स्वयमेव कामघटमानेतुं पक्षिवदाकाशे समुड्डीय संघमध्ये गतः । पार्श्वस्थान् सुभटानाहत्य तेषां खड्गखेट-कादीन् तिरस्कृत्य मञ्जूषां च भंक्त्वा बहून् सुभटा[illegible] तेन [illegible] महितं कामघटं गृहीत्वा पश्चात्त्वरितमागतः । ततो हर्षेण तेन घटेन मंत्रिणे भोजनं दत्तम् । अथ मंत्री वस्तुत्रयं लात्वा स्वनगरं न्यवर्तिष्ट । पथि चलन् विचारयति स्म मे धर्मप्रभावतः सर्वाशा धर्मप्रतिज्ञा च संपूर्णा जाता । पुनस्संसारे यावन्ति सद्वस्तूनि प्राप्यन्ते तत्समस्तं सद्धर्ममाहात्म्येनैव ।
तदुक्तं च-जैनो धर्मः प्रकटविभवः संगतिः साधुलोके, विद्वद्गोष्ठी वचनपटुता कौशलं सर्वशास्त्रे ।
साध्वी लक्ष्मीश्चरणकमलोपासना सद्गुरूणां, शुद्धं शीलं मतिरमलिना प्राप्यते भाग्यवद्भिः ॥७४॥
पत्नी प्रेमवती सुतः सविनयो भ्राता गुणालंकृतः, स्निग्धो बन्धुजनः सखातिचतुरो नित्यं प्रसन्नः प्रभुः ।
निर्लोभोऽनुचरः स्वबन्धुसुमुनिप्रायोपयोग्यं धनं, पुण्यानामुदयेन संततमिदं कस्याऽपि संपद्यते ॥ ७५ ॥

तथा च—यत्कल्याणकरोऽवतारसमयः स्वप्नाश्च जन्मोत्सवो, यद्रत्नादिकवृष्टिरिन्द्रजनिता यच्चक्रराज्यश्रियः ।
यज्ज्ञानं व्रतसंपदुज्ज्वलतरा यत्केवलश्रीर्नवा, यद्रम्यातिशया जिने तदखिलं धर्मस्य विस्फूर्जितम् ७६

स मंत्र्येवं धर्ममहिमानं विमृशन् परदेशादल्पदिनैरेव स्वगृहमाजगाम । अथ स राजा मंत्र्यागमनं विज्ञाय तस्मिन्नेव दिवसे तस्य धर्माधर्मपरीक्षाकरणार्थं बीजपूरकद्वयमानाय्यैकस्य बीजपूरकस्य मध्ये सपादलक्षमूल्यं रत्नं क्षिप्त्वैकस्य जनस्य हस्ते विक्रयार्थं समर्पितवान्, तस्मै चोक्तम्—शाकचतुष्पथे शाकविक्रयकारिणे त्वयैतत्समर्पणीयम् । यावत्पर्यन्तमेतत्कोऽपि न गृह्णीयात्तावत्त्वया तत्रैव प्रच्छन्नवृत्त्या स्थेयं । यदा कोऽपि गृह्णीयात्तदा तस्याऽभिधानं मदग्रे वाच्यं, तेन जनेन तथैव समस्तं स्वीकृतम् ।

यतः—कवीनां प्रतिभा चक्षुः, शास्त्रं चक्षुर्विपश्चिताम् । ज्ञानं चक्षुर्महर्षीणां, चारश्चक्षुर्महीभुजाम् ॥ ७७ ॥

ततो मंत्रिणो गृहागमनानन्तरं मंत्रिणो मार्गतापोपशान्त्यर्थं तदैव मंत्रिजायया प्रेषितदासी तत्रागत्य तदेव बीजपूरकं रत्नगर्भितं गृहीत्वा मंत्रिणे समर्पितवती, मंत्रिणापि तद्भक्षितं तन्मध्याच्च रत्नं गृहीतम् । अथ तेन जनेन सर्वं वृत्तान्तमवलोक्य राज्ञोऽग्रे सूक्तं सर्वमुक्तं, तन्निशम्य राज्ञा चिन्तितम्—अहो ! एतदपि नूनं धर्ममाहात्म्यमेवेति तेनावधारितम् । अथ रात्रौ मंत्रिणा धर्मासादितकामघटप्रभावेण सप्तभूमिकः स्वर्णमयावासः कृतः, तत्र रक्तरत्नखचितानि स्वर्णकपिशीर्षकानि भान्ति स्म । द्वात्रिंशद्वादित्रोपेतं दिव्यगीतनाद्यान्वितं नाटकं बभूव । एतद् दृष्ट्वा श्रुत्वा च राजा चमत्कारं गतस्सन् चिन्तयति स्म । किमयं स्वर्गः किमिन्द्रजालं वा स्वप्नं वा पश्यामीति विचारयन्निशायां सुष्वाप । ततः प्रभाते जायमाने स्वानुचरं पृष्टवान्, तदा तेन कथितं—स्वामिन्निदं नृत्यं निशायां मंत्रिणा कामघटप्रभावेण स्वर्णमयवररत्नमयकपिशीर्षकद्वात्रिंशद्बद्धनाट्ययुतं सौधोत्तममाविष्कृतम् । इतः प्रातर्मंत्री राज्ञे धर्मफलप्रदर्श-

नार्थं दिव्यवस्त्राणि परिधाय स्वर्णस्थालं भृत्वा राज्ञो मिलितः । राज्ञा पृष्टं—एतावन्ति रत्नानि कुतः प्राप्तानि ? मंत्रिणोक्तं धर्मप्रभावात् । पुना राज्ञोक्तं रात्री स्वर्णमयावासोपरि द्वात्रिंशद्बद्धनाटकं सर्वैवासीत् ? तेनोक्तं ममैव । ततस्तदावासं द्रष्टुकामेन राज्ञा मंत्रिणं प्रत्युक्तं, त्वं मत्कृस्स्वल्पपरिवारेण मासप्रान्तेऽपि स्वगृहे मां भोजय । तदा मंत्रिणोक्तं स्वामिन्नद्यैवाहं श्रीमन्तं भोजयिष्यामि । अतस्तव देशमध्ये यावान्मेलापकोऽस्ति तावन्तं मेलापकं गृहीत्वा मद्गृहे समागंतव्यं । नूनं यथायोग्ययुक्त्या भवन्तमहं भोजयिष्यामि । एतन्निशम्य राजा चिन्तयति स्म अहो ! वणिग्मात्रस्य मंत्रिणः कियत्साहसं ? नूनमेतेन मम मेलापकः पानीयमपि पाययितुं न शक्यते । एतत्तु पिपीलिकागृहे गतगजराजप्राघूर्णकवद् ज्ञेयं । अतः किं पुनर्भोजनं कारयितुं शक्यते ?, तदा रुष्टेन राज्ञा मंत्रिवार्तामन्यथा करणाय तद्दिन एव स्वभृत्यान्प्रेष्य स्वसर्वदेशमेलापको मेलितः । अथ राज्ञा सचिवालये सचिवस्वरूपदर्शनार्थं स्वचरः प्रेषितः, किमपि भोजनसामग्री आयमानाऽस्तीति विलोकय । तेनाऽपि तत्रागत्य यदामात्यालयस्वरूपं विलोकितं, तदा कापि मुष्टिमात्राप्यन्नसामग्री नाऽवलोकिता । पुनः सोऽमात्यस्तु सप्तमभूमौ सामायिकं गृहीत्वा नमस्कारमंत्रं जपंस्तेन दृष्टः, ततस्तेन चरेण पश्चादागत्य तत्सर्वं स्वरूपं राज्ञे निवेदितं, तदाकर्ण्य भूपश्चिन्तयति स्म—नूनमेष मंत्री ग्रथिलो भूत्वा दूरं गमिष्यति पश्चान्मयैवैतेभ्योऽखिलेभ्यो भोजनं देयं भविष्यति । अतः किं कर्त्तव्यमिति विचारमूढो जातस्तेन विचार्य कार्यकरणं युक्तमेव ।

यतः–सहसा विदधीत न क्रिया–मविवेकः परमापदां पदम् ।
वृणते हि विमृश्य कारिणं, गुणलुब्धाः स्वयमेव संपदः ॥ ७८ ॥

एतस्मिन्नन्तरे मंत्री समागतस्सन् विज्ञपयामास—स्वामिन् ! समागम्यतां रसवती शीतला जायते । तन्निशम्य भूपेनोक्तं—

हे मंत्रिन् ! मयापि सह किन्त्वया हास्यं प्रारब्धं ? यतस्त्वालये स्वल्पापि भोजनसामग्री नास्ति । तदा सचिवेनोक्तं—हे स्वामिन् ! सत्कृपादानवधार्य विलोकयतां सर्वा सामग्री प्रस्तुताऽस्ति । तदा धराधवः सपरिकरः प्रचलितो मार्गे च रोषारुणश्चिन्तयति स्म—एष यदि भोजनं न दास्यति तदा विविधविडम्बनया विगोपयिष्यामीति दुर्विचारः कोपवशेन तेन कृतः ।

तदुक्तं च–सन्तापं तनुते भिनत्ति विनयं सौहार्दमुत्सादय–त्युद्वेगं जनयत्यवद्यवचनं सूते विधत्ते कलिम् ।
कीर्तिं कृन्तति दुर्गतिं वितरति व्याहन्ति पुण्योदयं, दत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम् ७९
कोह पइट्ठिओ देहघरि, तिण्णि विकार करेइ । आप तपे पर संतपे, धणणी हाणि करेइ ॥ ८० ॥
लग्गो कोह–दवानलो, डज्झइ गुणरयणाइं । उवसमजले जो ओलवे, न सहइ दुक्खसयाइं ॥ ८१ ॥

ततो मनुष्यलक्षैः परिवृतो नृपतिस्तद्द्वारसमीपमागतः । तत्रस्थ एव तद्गेहाडम्बरं विलोक्य विचिन्तयति स्म—किमेष स्वर्गः, किमिन्द्रजालं वा, किमिदं सत्यमसत्यं वा !, यथा २ तममात्यालयमण्डपं पश्यति तथा २ राजा स्वमनसि चिन्तयति स्म–किमनेन मंत्रिणाऽद्यैवेदृशमिन्द्रजालं विकीर्याहं विप्रतारितः ! एवमनेकप्रकारचिन्तासमुद्रनिमग्नो विचारयति स्म । अथ राजान्ये च लोकास्तं मुहुर्मुहुरवलोक्यातीव भ्रान्तिपतिताः, यथा शुद्धस्वर्णपरीक्षानभिज्ञा अमूल्यकं स्वर्णमपहाय गच्छन्ति । तथा तेऽपि ततः स्वस्थानं प्रतिगन्तुमिच्छुकाः संजाता अग्रे नो गच्छन्ति स्म । अस्मिन्नवसरे शीघ्रमागत्य मंत्रिणा भूपतिं लोकांश्च स्वकरेणाभिगृह्य १ यथोचितस्थाने सर्वेषामुपवेशनार्थमासनानि दत्तानि । ततो मंत्रिणा कामघटप्रभावेणैतादृशी दिव्यपाकरसवती परिवेषिता, यथा

राजादयः सर्वेऽपि जनास्तामश्नमेष सुखेन भक्षयामासुः प्रशशंसुश्च ।
तद्यथा–शुभ्रं गोधूमचूर्णं घृतगुड–सहितं नालिकेरस्य खंडं, द्राक्षाखर्जूरसुंठीतजमरिचयुतं चैलचीनागपुष्पम् ।
पक्त्वा ताम्रे कटाहे तलवितलतटे पावके मंदहीने, धन्या हेमन्तकाले प्रियजनसहिता भुञ्जते लापसीं ये ८२
हिंग्वाजीरैर्मरीचैर्लवणपुटतरैरार्द्रकाद्यैः सुपक्वान्, स्निग्धान्पक्वान् मनोज्ञान्परिमलबहुलान्पेशलान्कुङ्कुमाभान् ।
क्षिप्त्वा दन्तान्तराले सुरमुरवदतः स्पष्टसुस्वादयुक्तान्, धन्या हेमन्तकाले मुखगतवटकान्भुञ्जते प्रीतिदत्तान्

गोधूमचूर्णं लवणेन मिश्रितं, जलेन पिण्डीकृतहस्तमर्दितम् ।
तङ्गोलिका गोमयवह्निपक्वाः, क्षुधाहराः पुष्टिकरा घृतने ॥ ८४ ॥

इति राजादिसर्वजनमुखादेवं प्रशंसां निशम्य मंत्रिणा राज्ञेऽभिहितम्—

पिब भूप ! सुदुग्धमहो ! मुदितः, कफमारुतपित्तविकारहरम् ।
मदनोदययोषिति कामकरं, सुरभिद्रवमिश्रिततापहरम् ॥ ८५ ॥
दधि भक्षय भूप ! सुखंडयुतं, घनसारविमिश्रितगन्धयुतम् ।
शुचिकामकरं बलपुष्टिकरं, शुभसैन्धवजीरकमाशुगहम् ॥ ८६ ॥

घृतमद्धि जनेश्वर ! पुष्टिकरं, मदनोदयमिन्द्रियतृप्तिकरं । बहुकांतिकरं हृततापभरं, मधुरेक्षसुधारसदूरकरं ८७

शशिकांतिसमुज्ज्वलशंखनिभं, परिपक्वसुगन्धकपित्थसमम् ।
युवतीमृदुपाणिविनिर्मथितं, पिब तक्रमिदं तनुरोगहरम् ॥ ८८ ॥
हिमशीतलनिर्मलकुंभभृतं, घनसारसुवासितवातयुतम् ।
युवतीकरहेमकचोलभृतं, रिपुपक्षहरं पिब भूप ! जलम् ॥ ८९ ॥

इत्यादि मंत्रिप्रेमवाक्यं शृण्वन् रसवतीं भुंजानः सन् राजा पार्श्वस्थान् पुरुषान् पृच्छति–भो जनाः ! एवंविधा रसवती कापि युष्माभिरास्वादिता दृष्टानि वा श्रुतानि वा ? सर्वे जनास्तदैवमाहुर्न कापि । एवमतिभक्त्या राजादयस्सर्वे जनास्तेन भोजिताः । तदनु च तेषु केसरचन्दनच्छटा निक्षिप्ताः, तांबूलानि च सर्वेभ्यो दत्तानि दिव्यवस्त्राभरणादीनि च परिधापितानि। तदनु विस्मितेन राज्ञा मंत्री पृष्टः—भो मंत्रिन् ! एतावन्तो जनास्त्वया कस्य प्रसादेन भोजिताः? मंत्रिणोक्तम्—महाप्रभावशालिनो देवाधिष्ठितस्य कामघटस्य प्रसादेन । तदा राज्ञोक्तं तं कामघटं ममार्पय, यतः शत्रुसैन्यादिकृतपराभवावसरे स सर्वदा मम महोपयोगी भविष्यति । ततोऽमात्येनोक्तम्—अधर्मवतस्तव गृहे स सर्वथा न स्थास्यति । नृपेणोक्तं सकृत्त्वं मेऽर्पय पश्चादहमतिप्रयत्नेन स्थापयिष्यामि, पुनरहं तवोपकारं ज्ञास्यामि। सचिवेनोक्तम्— अतःपरं किमहं ब्रवीमि भवदमात्योस्मीति ददामि, परं दिनत्रयं तु भवद्भिः सावधानतयावश्यमस्य रक्षा विधेयेति मया स्पष्टं ज्ञापितोऽसि । नातःपरं मे कोऽपि दोष इत्युक्त्वा मंत्रिणा स कामघटस्तस्मै समर्पितः । नृपेणाप्यतिप्रयत्नेन स्वालयभाण्डागारे स्थापितः, परितश्च तद्रक्षार्थं सारभूता निजसहस्रसुभटाः खड्गखेटकधरा सेना च स्थापिता ।

यतः-सामी सूरा भार करि, परिहर कायर सट्ठि। जे संपत्ति पारखडे, ते वारे भउसट्ठि ॥ ९० ॥

अतो युष्माभिर्मे बान्धवरूपैः सेवकैरिदं कार्यं सावधानतया विधेयम्।

उक्तं च-आतुरे व्यसने प्राप्ते, दुर्भिक्षे शत्रुनिग्रहे। राजद्वारे स्मशाने च, यस्तिष्ठति स बान्धवः ॥ ९१ ॥

अपि च-जानीयात्प्रेषणे भृत्यान्, बांधवान् व्यसनागमे। मित्रमापदि काले च, भार्यां च विभवक्षये ॥९२॥

एवं राज्ञा भृत्याः शिक्षिताः। अथ द्वितीयदिवसे तस्मिन् पुरेऽपि धर्ममाहात्म्यदर्शनार्थं मंत्रिणा दंडं प्रत्युक्तम्—भो दण्ड! कामघटं मे समानयेति, तदैव स दंडस्तत्र गत्वा सर्वान् हयगजसुभटान् कुट्टयित्वा रुधिरवमनांश्च विधाय मूर्च्छाभिभूतान् कृत्वा राज्ञः पश्यत एव तं कामघटं गृहीत्वा मंत्रिगृहे समागतः। राजा तं घटं गतं दृष्ट्वा विषण्णचेता मंत्रिगृहे गत्वोवाच-भो मंत्रिन्! पापिनो गृहे सद्वस्तु न तिष्ठतीति तवोक्तं सर्वं सत्यं जातम्। अतः सांप्रतं ममालयेऽप्यमनर्थः समुत्पन्नः, ततस्त्वं प्रसादं कृत्वा मत्सैन्यं सज्जीकुरु। एवं राज्ञो बह्वाग्रहेण मंत्री तत्र गत्वा तेषां सुभटानामुपरि प्रभावान्वितं चामरयुगलं वीजयित्वा सर्वानपि सज्जीकृतवान्। ततो मंत्रिणोक्तं भो राजन्! मद्धर्मप्रभावोऽयं दृष्टः? राज्ञोक्तं दृष्टः। ततो राज्ञापि मन्त्रिप्रसङ्गाद् धर्मोऽङ्गीकृतः प्रोक्तं च सर्वमपि भव्यं धर्मादेव भवति।

यतः-धर्मादेव कुले जन्म, धर्माच्च विपुलं यशः। धर्माद्धनं सुखं रूपं, धर्मः स्वर्गापवर्गदः ॥ ९३ ॥

रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं, कान्ताऽरूपाभिमतरलयाः सूनवो भक्तिमन्तः।

षट्खंडोर्वीतलपरिवृढत्वं यशः क्षीरशुभ्रं, सौभाग्यश्रीरिति फलमहो! धर्मवृक्षस्य सर्वम् ॥ ९४ ॥

कुलं विश्वश्लाघ्यं वपुरपगदं जातिरमला, सुवित्तं सौभाग्यं ललितललना भोग्यकमला ।
चिरायुस्तारुण्यं सकलविकलं स्थैर्यमतुलं, यदन्यच्च श्रेयो भवति भविनां धर्मत इदम् ॥ ९५ ॥

अहो ! सर्वतोऽधिको धर्मस्य प्रभावो नत्वन्यस्येति सर्वैर्नगरलोकैरपि धर्मोऽङ्गीकृतो मानितश्च ।

यतः–राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापाः समे समाः । राजानमनुवर्तन्ते, यथा राजा तथा प्रजाः ॥ ९६ ॥

अथ कियद्दिनानि यावत्तेन राज्ञा तथाविधधर्मप्रभावो मानितः । तदनु पुनरपि चलचित्तेन राज्ञैकदा मंत्रिणं प्रति प्रोक्तम्—हे मंत्रिन् ! घुणाक्षरन्यायेन सकृत्तत्र भाग्यं फलितं परं नायं धर्मप्रभावः । इदं सर्वमपि पापफलमेव, यदि त्वं धर्मप्रभावं सत्यमेव मन्यसे, तर्हि पुनरपि द्वितीयवारं मम धर्मफलं दर्शय । परं कामघटं चामरयुगलं दंडं चाऽत्रैव मुक्त्वा, निःसंबलः समायैस्त्वं देशान्तरे गत्वा, धनमर्जयित्वा, पुनरपि यदि त्वमत्रागमिष्यसि तदाहं तव सत्यधर्मप्रभावं मंस्ये नाऽन्यथा । एवंविधानि राज्ञो वचनान्याकर्ण्य मंत्री चिन्तयति स—पूर्वमेष राजा महानधर्म्यभूत्पुनरपि तथैव जातः, प्रथमन्तु महापरिश्रमेण परीक्षां विधाय धर्मांगीकृतः । अथ पुनस्तदवस्थयैव स्थितो हन्त ! यस्य यथा शुभोऽशुभो वा स्वभावोऽस्ति स तेन कदापि नो मुच्यते ।

यतः-रक्तत्वं कमलानां, सत्पुरुषाणां परोपकारित्वम् । असतां च निर्दयत्वं, स्वभावसिद्धं त्रिषु त्रियतम् ॥९७॥

अपि च–काकस्य गात्रं यदि कांचनं स्यात्, माणिक्यरत्नं यदि चंचुदेशे ।
एकैकदेशो ग्रथितो मणीभि–स्तथापि काको न तु राजहंसः ॥ ९८ ॥

अरे ! एष दीनोऽधर्मी धर्मगुणं कथं वेत्ति ? धर्मगुणन्तु धर्मी विद्वानेव जानाति ।

यतः–प्रतिपचन्द्रं सुरभि–र्नकुलो नकुलीं पयश्च कलहंसः । चित्रकवल्लीं पक्षी, शुद्धं धर्मं सुधीर्वेत्ति ॥ ९९ ॥

एवं मंत्रिणा विचारितं, तथापि साहसिकेन परोपकारतत्परेण मंत्रिणा तद्राज्ञोक्तं द्विवारमपि मानितम् । कुतो जगति विना प्रयोजनं यत्परोपकारकरणमिदमेव सर्वोत्तमत्वम् ।

उक्तं च–अकृतज्ञा असंख्याताः, संख्याताः कृतवेदिनः । कृतोपकारिणः स्तोकाः, द्वित्राः स्वेनोपकारिणः ॥१००॥

वरं करीरो मरुमार्गवर्ती, यः पांथसार्थं कुरुते कृतार्थम् । कल्पद्रुमैः किं कनकाचलस्थैः, परोपकारप्रतिलंभदुःस्थैः ? ॥ १ ॥

छायामन्यस्य कुर्वन्ति, स्वयं तिष्ठन्ति चातपे । फलन्ति च परस्यार्थे, नात्महेतोर्महाद्रुमाः ॥ २ ॥

पिबन्ति नद्यः स्वयमेव नाम्भः, खादन्ति न स्वादुफलानि वृक्षाः ।
पयोमुचः किं विलसन्ति शस्यं, परोपकाराय सतां विभूतयः ॥ ३ ॥

अपि च–क्षुद्राः सन्ति सहस्रशः स्वभरणव्यापारचक्रादराः, स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः ।
दुष्पूरोदरपूरणाय पिबति श्रोतःपतिं वाडवो, जीमूतस्तु निदाघसंभृतजगत्सन्तापविच्छित्तये ॥ ४ ॥

तदनु स मंत्री राज्ञे निजगृहं समर्प्य विनयसुन्दरीभार्यायुक्तो देशान्तरं चचाल, गच्छन् कियद्दिवसैः समुद्रतटे गंभीरपुरनाम नगरं प्राप । तन्नगरासन्नवाटिकायां च देवकुलमासीदिति जिनेश्वरदेवनत्यर्थं श्रीवीतरागप्रासादे गतः । तदवसरे तत्रस्थजनमुखात्तेन

श्रुतं यत्सागरदत्तनामा व्यवहारी पूरितयानपात्रो द्वीपान्तरं प्रति गच्छन् लोकेभ्यो बहुलं दानं ददाति । तन्निशम्य स मंत्र्यपि निजसुन्दरीं तत्रैव मुक्त्वा दानग्रहणार्थी समुद्रतटं गतवान् । तत्र तेन दानार्थिजनानां बहुसमुदायो मिलितो दृष्टः ।

यतः—वयोवृद्धास्तपोवृद्धाः, ये च वृद्धा बहुश्रुताः । सर्वे ते धनवृद्धानां, द्वारे तिष्ठन्ति किंकराः ॥ ५ ॥

अपि च—यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः, सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ ६ ॥

इतो मंत्रिणा सर्वलोकेभ्यो द्रव्यदानानन्तरं वाहने समारूढः सागरदत्तो व्यवहारी दृष्टः । तेन सोऽपि दानाय जलमध्ये कियद् दूरं गत्वा वाहने समारुह्य तस्य श्रेष्ठिनः पार्श्वे दानं याचितवान् । व्यवहारिणापि तद्धर्मप्रभावेण तस्मै यथेष्टं दानं दत्तं, मंत्रिणापि शीघ्रमेव गृहीतम् ।

यतः—दाणं मग्गणदव्वं, भाडं लंचा सुभासियं वयणं । जं सहसा न य गहियं, तं पच्छा दुल्लहं होइ ॥ ७ ॥

एवं दानं गृहीत्वा मंत्री यावत्पश्चादागन्तुमिच्छति तावत्सुवायुना प्रेरितः पोतोऽह्नाय समुद्रमध्ये दूरं गतः । तेन पश्चात्तटे समागन्तुं समर्थो नो बभूव, प्रवहणमध्ये एव स्थितः । अथ सागरदत्तेन व्यवहारिणा मिथः कथाप्रसंगेन स मंत्री सकलकलाकलापकुशलो ज्ञातः । ततस्तेन श्रेष्ठिना मंत्री पृष्टस्त्वं लेखलिखनादिकं किमपि वेत्सि ? तेनोक्तं सम्यग् वेद्मि । हे श्रेष्ठिन् ! द्वासप्ततिकलाकुशलत्वन्त्वास्तां परं धर्मकलाज्ञानं विना भगवन्नामस्मरणं विना च सर्वमपि निरर्थकमेव ।

यतः—बावत्तरिकलाकुसला, पंडियपुरिसा अपंडिया चेव । सव्वकलाणं पवरा, जे धम्मकलं न जाणंति ॥८॥
अपि च—सीखेहो अलेख लेख कविता गीतनाद-छन्द ज्योतिषके सीखे रहते मगरूरमें,
सीखेहो सौदागिरी सराफी बजाजी लाख, रुपियनके फेरफार बहेजात पूरमें ।
सीखेहो जंत्र मंत्र तंत्र बातां भातां बहु ज, जगत कहत जाको हाजर हजूर ! में,
कहे मुणि 'राजेंद्रसूरि' जिननाम बोलवो, नहीं सीख्यो ताको सब सीख्यो गयो धूरमें ॥९॥

एवं धर्मसंबन्धीनि वचनान्याकर्ण्य सहर्षेण व्यवहारिणोक्तम्—तर्हि त्वं मम व्यापारसंबन्धि लेखादिकर्म कुरु, तेनापि तदंगीकृतं, ततो व्यवहारिणापि स लेखादिकार्ये स्थापितः । एवं स तत्र सुखेन कालं गमयति स्म ।

अथ मंत्रिणा देवकुले मुक्ता या स्वपत्नी विनयसुन्दरी सा निजभर्तृप्रवासगमनकालादारभ्य तत्रैवासीना तदागमनमार्गं प्रपश्यन्त्येवं विचारयति स्म—अहो ! केन हेतुना मे स्वामी मामेकाकिनीं मुक्त्वाऽधुनावधि नो समायातः । लोके ये खगा अपि वने स्वजीविकार्थमगच्छन्, तेऽपि कृत्वोदरपूर्तिं स्वैनैव मनसा स्वस्वस्थाने प्रत्यायान्ति, पुनर्मे पतिस्तु दानार्थं गतोऽधुनापि न समायातः । अतो रे हृदय ! यदि त्वं स्वामिनि संपूर्णतया निजप्रेम रक्षसि तर्हि तद्विरहे कथं विनाशं नाधिगच्छसि ? । पतिसमीपावस्थानमेव पतिव्रतानां पतिव्रतात्वं, अन्यथा तासां विनाश एव नैव लोके कुत्रापि शोभा च ।

यतः—राजा कुलवधूर्विप्रा, नियोगी मंत्रिणस्तथा । स्थानभ्रष्टा न शोभन्ते, दन्ताः केशा नखा नराः ॥१०॥

पुनश्चिन्त ! तद्विरहे स्वस्थेन त्वया कथमहं लज्जावती क्रिये ? । एतेन तु व्याघ्री समागत्य यदि मां भक्षयेत्तदा वरं, एतदेवानुपमेयमौषधं मद्दुःखहरणाय भवतु । एवं विविधरीत्या पौनःपुन्येन स्वकर्मणो दोषान्निष्कास्य तदैकाकिन्येव सा वराकी निजाज्ञानवशेन पूर्वदुष्कृतकर्माणि निनिन्द । पुनर्विलापपूर्वकं रोरूयते स्म—हन्त ! पूर्वस्मिन् भवे मया महान्ति कोटिशः कल्मषाण्युपार्जितानि येन मद्वल्लभो मामेवं पथ्येव विहाय गतः ! अथाहं निराश्रया क्व गच्छामि ? अस्मिन् क्षणे परमस्नेहवन्तो गोवत्सा अपि स्तन्यपानं विधातुं स्वमातरं प्राप्ताः । प्रतिगृहं प्रज्वलच्छिखा दीपमालिकाश्च प्रज्वलिताः । रात्रिचराश्चोन्मत्ताः सन्तो नर्तितुं लग्नाः । विरहिजनविरहार्तिवर्द्धनश्चन्द्रोऽप्युदियाय । पुनस्तेन विरहिणोऽतीव दुःखिताः समजायन्त । अथाऽहमनाथा किं कुर्यां चक्रवाकीव गाढतरदुःखधारिण्यहमभूवम् । एवमनेकधा विलप्य सा तत्रैव वाटिकायां भर्तृगमनजं दुःखं सस्मार । अपि चाहो ! क्व मे पितरौ क्व चाहं ?, मया यत्र यत्र दृग्विन्यस्यते तत्र सर्वत्र पत्यभाव एव विलोक्यते । हा प्राणनाथ ! प्रतिक्षणं ते मुखाब्जाकृतिस्मरणं कुर्वत्या मेऽक्षिणी जीमूतो जलधारामिवाश्रुधारां मुंचतः । हे पतिदेव ! त्वां विना कोऽप्यसमानायामस्यां वाटिकायां मह्यं सायं स्थानं दास्यति । अन्यथा कथमहं स्वशीलव्रतं रक्षिष्यामि ? किं बहु निगदामि किमनुतिष्ठामि ? हे पतिदेव ! त्वदभावेऽहं सर्वतो दिङ्मूढा निश्शोभा गतविचारा च जातास्मि । सैवंविधं नानाविलापजं परिदेवनं चिरं विधायोत्थाय च इतस्ततः परिभ्रम्यावलोकयति स्म । ततः कुत्रापि स्वाम्यभिज्ञानमलभमानातीवोदासीना सती सा उदस्थात् । निवेशं विलोकयन्ती वाटिकोपकंठे कुलालमेकमद्राक्षीत् । अथ तत्समीपं गत्वैवं सुबाला मृद्व्या संबन्धसूचिकया दीनया गिरा तमवादीत्—हे बान्धव ! यदि त्वं मां स्वसारमिवांगीकुर्यास्तर्ह्यहमन्यदेशनिवासिनी स्वदुःखपूर्णां विज्ञप्तिं श्रावयेयम् ।

अथ दयालुरतिसज्जनः कुंभकारोऽपि दयां विधाय प्रत्यवोचत्— हे स्वसः! यत्त्वदुःखं भवेत्तन्निवेदय, मया त्वं स्वसृत्वेनांगीकृतासि। तन्निशम्य सा प्राह—हे भ्रातर्महानुभाव! शृणु, मामत्रस्थां मुक्त्वा मे पतिः क्वापि दानग्रहणाय गतोऽस्ति, स चाधुनापर्यन्तं मत्समीपे नो समागतः, तस्य बहुवेला व्यतिगता। अथाहं निराधारा क्व गच्छामीति विचार्य, अन्यत्र कुत्राप्याधारभूतं त्वत्समानमन्यजनमलभमाना त्वदन्तिके समागमम्। हे प्रियबान्धव! अतःपरं त्वमेव ममाधारभूतः शरणभूतश्चासि नान्यः कोऽपि। अथ हे करुणासागर! ममोपर्यनुग्रहं विधाय मामाज्ञापय यदहं पत्यागमनावधि त्वद्गृहे निवासं कुर्याम्। एवंविधानि स दुःखप्रलपितानि विनयसुन्दरीवचनान्याकर्ण्य दयार्द्रचेतसा परोपकारिणा तेन तस्याः पुण्यशीलमाहात्म्येन स्वभगिनीत्वेनांगीकृत्य सम्यक् प्रकारेणाऽऽश्वास्य च स्वगृह एव सा रक्षिता। ततः शीलशृंगारशोभिता सा तत्र कुलालसद्मनि सतीत्वपवित्रगुणगन्धवती शीलव्रतरक्षाहेतोः सुनियमान् धारयामास। तानाह—भर्तुर्मिलनावधि मया भूमौ शयनीयं, शोभार्थं स्नानं न करणीयं, सुन्दरवस्त्राणि त्याज्यानि, पुष्पांगरागविलेपनं त्याज्यं, ताम्बूललवंगैलाजातिफलादीनि नास्वाद्यानि वै, शरीरमलमपि विभूषार्थं नापनेयं, सर्वहरितशाकानि त्याज्यानि, पुनर्दधिदुग्धपक्वान्नगुडखंडशर्करापायसप्रभृति सरसमाहारं न भोक्ष्ये, किन्तु नीरस एवाहारो मया ग्राह्यः, सदैकभुक्तमेव कार्यं, महत्कार्यं विना गृहाद् बहिर्न निर्गन्तव्यं, गवाक्षेषु न स्थातव्यं, लोकानां विवाहाद्यपि न वीक्षणीयं, सखीभिः सहापि नर्मालापपुरुषस्त्रीशृंगारहास्यविलासनेपथ्यादिका विकथा नैव कार्या, वैराग्यकथैव परिकथनीया परिवर्तनीया च। कर्मकरादिभिः सहाप्यालापसंलापादिकं विशेषतो न कार्यं, तर्हि अन्यपुरुषैः सह तु दूरे एव, किं बहुना चित्रस्था अपि पुरुषा नावलोकनीयाः।

यतः—लज्जा दया दमो धैर्यं, पुरुषालापवर्जनम्। एकाकित्वपरित्यागो, नारीणां शीलरक्षणम्॥ ११॥

एवं कुर्वती तत्र कुलालगृहे सुखेन निवसति स्म। इतः स मैत्री तेन व्यवहारिणा सह सुखेन रत्नद्वीपं गतः। तत्र सुरपुरनाम नगरं पुरंदराभिधश्च राजा राज्यं शास्ति स्म। अथ तेन व्यवहारिणा स्वप्रवहणेभ्यः सर्वक्रयाणकान्युत्तार्य वखारेषु निक्षिप्तानि। तेषां क्रयविक्रयादिः सर्वो व्यवसायस्तेन श्रेष्ठिना मंत्रिणे समर्पितः, तेन स मैत्री तत्र सर्वव्यवसायं करोति स्म। सागरदत्तो व्यवहारी तु नगरान्तःस्थितः गणिकायामासक्तोऽजनि, तस्या गृहे स सागरदत्तो व्यवहारी तस्यां मुग्धमनाः निरन्तरन्तया सार्द्धमभिनवान् भोगाननुबभूव। अतः सूर्यस्योदयास्तावपि न जानाति स्म। शास्त्रेऽप्युक्तं यैर्निजशीलरत्नं विलुप्तं तैर्धनादिजन्मसमस्तं हारितम्।

यतः—दत्तस्तेन जगत्यकीर्तिपटहो गोत्रे मषीकूर्चक–श्चारित्रस्य जलांजलिर्गुणगणारामस्य दावानलः।

संकेतः सकलापदां शिवपुरद्वारे कपाटो दृढः, शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिन्तामणिः॥ १२॥

पुनस्तेन कुशीलेनापध्यानमर्थं विपत्तिं च परशीलम्पटा जना दिने दिने लभन्ते, तांश्च परदारवेश्यादिभोगिनो निन्दितनरास्तथा ये दुर्जनाः पिशुनाः छलान्वेषिणश्च ते प्रतिपदं निगृह्णन्ति। राजादिलोका दण्डयन्ति स्वजनादयश्चापि निर्भर्त्सयन्ति।

यतः—कलिः कलंकः परलोकदुःखं, यशश्च्युतिर्धर्मधनस्य हानिः।

हास्यास्पदत्वं स्वजनैर्विरोधो, भवन्ति दुःखानि कुशीलभाजाम्॥ १३॥

अथ स श्रेष्ठी विषयमोहितस्तस्यै गणिकायै प्रसादभूतं मुद्रालक्षं ददौ। स च यानि २ कार्याणि गणिका समाज्ञापयति स्म तानि सर्वाणि तत्क्षणमेवातिहर्षेण विदधे। कुललज्जामर्यादादीनगणयित्वा यथा मद्यपाः परवशदेहा भवन्ति तथा सोऽपि विषयमदान्धो बभूव।

यतः—यौवनं धनसंपत्तिः, प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय, किं पुनस्तच्चतुष्टयम् ॥ १४ ॥

पूर्वमहर्षिभिर्विद्वद्वर्यैरपि स्त्रीदेहमुद्दिश्य धर्मशास्त्रे नीतिशास्त्रेऽपि च सर्वेषां बन्धनरूपं भणितमस्ति ।

यथा—संसारे हयविहिणा, महिलारूवेण मंडियं पासं । बज्झंति जत्थ मुद्धा, जाणमाणा अजाणमाणा वि ॥१५॥

मदिराया गुणज्येष्ठा, लोकद्वयविरोधिनी । कुरुते दृष्टमात्रापि, महिला ग्रथिलं जनम् ॥ १६ ॥ अपि च—

तावद्वीरोऽतिवीरः समरसरभसावेगगाढे गभीर-स्तावद्धर्मे दृढोऽसौ श्रुतिमुखगदिते पंडितोऽप्यत्र तावत् ।

तावल्लज्जा सपर्या मननिपुणता योगवासिष्ठनिष्ठा, यावत्सस्मेरनारीनयनतटगतापांगभल्ली न लग्ना ॥१७॥

एवं स श्रेष्ठी विषयासक्तत्वाद्बहु धनव्ययं कुर्वन् वारांगनागृहे तिष्ठति स्म । अथैकदा सा वारांगना मनस्येवं विचिन्तयामास—यदस्य वणिजो मुनीमाख्यो यो धर्मबुद्धिनामा सर्वव्यापाराधिकारी वर्तते, स यदि केनचिदप्युपायेनास्माकं गृहे समागच्छेत्तर्हि स मुख्यत्वान्मे बहुधनं दत्वा सम्यक् संतोषयेद् नूनस्नेहत्वादिति विचिन्त्य तन्मनश्चालनाय सा षोडशशृंगारान् व्यधात् ।

यथा—आदौ मज्जनचारुचीरतिलकं नेत्रांजनं कुंडलं, नासामौक्तिकहारपुष्पनिकरं झंकारवन्नूपुरम् ।

अंगे चन्दनचर्चितं कुचमणिः क्षुद्रावली घंटिका, ताम्बूलं करकंकणं चतुरता शृंगारकाः षोडश ॥१८॥

एभिः शोभनशृंगारैः स्वदेहं साक्षात्स्वर्वेश्येव विधाय कपटनाटककर्तुः कत्वा सिंहं, वेण्या शेषनागं, मुखेन मृगांकं, गत्या गजं, अक्ष्णा मृगीं, स्वसुन्दररूपेण रतिञ्च पराजयमाना, परितः कटाक्षबाणान् विक्षिपन्ती, भ्रमरावलीसमालका भूवरा कामुकजनप्राणान्

कामबाणेन विध्यन्ती स्वर्णरेखाशोभितदन्तावलिका कृतवक्रमुखं कराग्रायां परिहितमुद्रिकां मुहुर्मुहुः प्रपश्यन्ती, शिरोवेण्यां ग्रीवायां पंचवर्णपुष्पमालाधरा च साक्षात्कल्पलतेव शोभमाना घनकुचकुंभभारैरानम्रीभूतहृदया चलन्ती प्रतिपदं स्नेहं प्रकाशयन्ती गंभीरनाभिका कृशोदरी नूपुरं रणत्काररवं वादयन्ती पिकीव प्रियभाषिणी जितेन्द्रियाणामनेकसाहसिकानाञ्चापि सत्त्वभंजिका, एवंप्रकारा सा गणिका द्रुतं मंत्रिणोऽग्रे समाजगाम। आगत्य पैशीकशानुल्कनयन्ती मुखेनोच्छ्वसन्ती आलस्यभरेणांगं मोटयन्ती कंचुकीबन्धनं च शिथिलीकुर्वती अनेकहावभावविभ्रमादिविलासान् कुर्वाणा स्ववशानयनाय स्वात्मानं मंत्रिणं दर्शयामास ।

तथाहि—हावो मुखविकारः स्याद्, भावश्चित्तसमुद्भवः । विलासो नेत्रजो ज्ञेयो, विभ्रमो भ्रूसमुद्भवः ॥ १९ ॥

अथ नृत्यपूर्वकं हावभावादिविषयासक्तं युवकगणं कुर्वतीं तां गणिकां प्रति सद्गुणसमुद्रो मंत्री जगाद्—अये विरूपभाषाभाषिणि ! कथमेवं प्रलपसि त्वं केनाहूतासि ? उन्मत्तेव वारम्वारं किमर्थमसमंजसं भाषसे ? हे विषनेत्रे ! हे दुष्टालापिनि ! त्वमत्र मा किमपि वद, नाहं त्वया साकं समागमिष्यामि, न किमपि कथयिष्यामि, नैव च कदापि त्वां सेविष्ये ।

यतः—कश्चुम्बति कुलपुरुषः, वेश्याधरपल्लवं मनोज्ञमपि । चारभटचौरचेटक—नटविटनिष्ठीवनशरावम् ॥२०॥

या विचित्रविटकोटिनिघृष्टा, मद्यमांसनिरतातिनिकृष्टा ।
कोमला वचसि चेतसि दुष्टा, तां भजन्ति गणिकां न विशिष्टाः ॥ २१ ॥ अपि च—

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलांगाय च, ग्रामीणाय च दुष्कुलाय च गलत्कुष्ठाभिभूताय च ।
यच्छन्तीषु मनोहरं निजवपुर्लक्ष्मीलवश्रद्धया, पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु को रज्यते ? २२

अथ मे सम्मुखमपि मा पश्य, कथं मद्गृहे विनादेशं समागता ? पुनर्हे गणिके ! मद्वाक्यं शृणु–यदि त्वं केवलस्वर्णमयी भवेस्तथाप्यहं त्वां नाभिलषामि, नानुरक्तो भवामि, नास्ति सप्तधातुकेऽस्मिन् ते देहे मे भोगरुचिः, एषा तनुर्दुर्गन्धपूर्णा चर्मखण्डिता [illegible] नवभिः छिद्रैरहर्निशं मलवाहिनी सर्वतोऽशुच्यागारभूता । एवंभूतां तनुं पुरीषाभिलाषुका एवांगीकुर्युर्नान्ये । अतोऽहं ते विग्रहं मनसापि नाभिलष्यामि, तर्हि कायेन किम् ? पुनर्या स्त्री मद्यपा इवोन्मत्तास्मिन् लोकेऽकार्यकर्त्री विलोक्यते सा दर्शनमात्रेणैव सर्वमैहिकं पारत्रिकं च पुण्यं विनाशयति। यत्स्वभाषितं तदपि न सत्यापयतीति सा कथं विश्वासार्हा ? अनेनैव कारणेन महानर्थमूला स्त्रीतनुरिति ज्ञात्वा ज्ञानिनो लोकाः परदारसंगं त्यजन्ति । कुतो विषयाब्धिनिमग्नैः सद्भिरेकवारमपि यत्परदारगमनं विधीयते, तर्हि तैरेकविंशतिवारं सप्तमनरकदुःखमनुभूयत एव ।

यदुक्तं- तस्माद्धर्मार्थिभिस्त्याज्यं, परदारोपसेवनम् । नयन्ति परदारास्तु, नरकानेकविंशतिम् ॥२३॥

अपिच–भक्खणे देवदव्वस्स, परत्थीगमणेण य । सत्तमं नरयं जंति, सत्तवाराओ गोयमा ! ॥ २४ ॥

पुनरपि तद्दोषेणात्र लोक एव तैः क्लीबत्वं कुरोगित्वमिन्द्रियहीनत्वं च लभ्यते । तेषां नामापि न कोऽपि गृह्णाति, एवं ते दुःशीलिनो निद्याः दौर्भाग्यशालिनश्च जायन्ते । अतएव हे वारांगने ! न कदाप्यहं त्वय्यनुरक्तो भविष्यामि । एवंविधं मंत्रिवाक्यचातुर्यमाकर्ण्य तयान्ते ज्ञातम्—मम कलाकौशलमस्य शीलभ्रष्टकरणे न प्रभवति । इति विमृश्य ततोऽपसृत्य च यथाऽऽगता तथैव सा स्वस्थानं त्वरितं परावर्तिष्ट । एवं परिवर्जितकुसंगस्य तस्य मंत्रिणस्तस्मिन् सकलेऽपि नगरे शीलमहिमसुप्रसिद्धिर्जाता।

यदुक्तं–सीलं उत्तमवित्तं, सीलं जीवाण मंगलं परमं । सीलं दोहग्गहरं, सीलं सुक्खाण कुलभवणं ॥ २५ ॥
सुविसुद्धसीलजुत्तो, पावइ कित्तिं जसं च इहलोए । सव्वजणवल्लहो चिय, सुहगइभागी अ परलोए ॥ २६ ॥
देवदाणवगंधव्वा, जक्खरक्खसकिन्नरा । बंभयारिं नमंसंति, दुक्करं जे करंति तं ॥ २७ ॥

अपि च–वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्, मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरंगायते । व्यालो माल्यगणायते विषरसः पीयूषवर्षायते, यस्यांगेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ २८ ॥

अथैकदा राज्ञा तन्नगरे तटाकं खानयितुं प्रारब्धं । ततः कियद्दिवसैर्लिखितताम्रपत्राणि निःसृतानि, जनैश्च राज्ञे समर्पितानि । राज्ञापि तत्र लिखितलेखपरिवाचनाय तानि पण्डितेभ्यः समर्पितानि, किन्तु तत्र लिप्यन्तरसद्भावात्कोऽपि तानि वाचयितुं न शक्नोति स्म । तदा कौतुकप्रियेण राज्ञा पटहो वादितो यथा–यः कोऽप्यमून्यक्षराणि वाचयिष्यति तस्य राजा स्वीयकन्यामर्द्धराज्यं च दास्यतीति वाद्यमानः पटहः क्रमेण मंत्रिगृहसमीपमागतस्तदा मंत्रिणा स पटहः स्पृष्टः । ततोऽमात्येन नृपसभायां गत्वा तानि ताम्रपत्राणि वाचितानि यथा–यत्रैतानि पत्राणि निःसृतानि, ततः पूर्वस्यां दिशि दशहस्तमितं गत्वा कटिप्रमाणं पृथिवीखनने सति तत्रैका महती शिला समेष्यति, तस्या अधश्च दीनाराणां दशलक्षाणि सन्ति, तन्निशम्य सर्वेषां चमत्कारोऽभूत् । कौतुकालोकोत्कण्ठित-मानसेन राज्ञोक्तं तर्हि सैम्प्रत्येव तत्र गत्वा विलोक्यते, ततः सर्वजनपरिवृतो राजा तत्र गतः । ताम्रपत्रोक्तविधिश्च तेन कारितः, दशलक्षाणि सुवर्णानां निःसृतानि, सर्वेषां महान् हर्षो जातो, राज्ञापि मंत्रिणः प्रशंसा कृता, यदहो ! कीदृशं ज्ञानस्य माहात्म्यमिति ।

यदुक्तं-विद्वत्त्वञ्च नृपत्वं च, नैव तुल्यं कदाचन । स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥२९॥

रूपयौवनसंपन्ना, विशालकुलसंभवाः । विद्याहीना न शोभन्ते, निर्गन्धा इव किंशुकाः ॥ ३० ॥

वरं दरिद्रोऽपि विचक्षणो नरो, नैवार्थयुक्तोऽपि सुशास्त्रवर्जितः ।

विचक्षणः कार्पटिकोऽपि शोभते, न चापि मूर्खः कनकैरलंकृतः ॥ ३१ ॥

अपि च-विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।

विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं, विद्या राजसु पूजिता नहि धनं विद्याविहीनः पशुः ॥३२॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति सर्वात्मना, ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं वृद्धिं परां गच्छति ।

कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं, येषां तान्प्रति मानमुज्झत जनाः कस्तैः सह स्पर्धते ॥३३

किञ्च-पंडितेषु गुणाः सर्वे, मूर्खे दोषास्तु केवलाः । तस्मान्मूर्खसहस्रेषु, प्राज्ञ एको विशिष्यते ॥३४॥

अथ तत्कौशल्यचमत्कृतेन राज्ञा तस्मै मंत्रिणे सौभाग्यसुन्दर्यभिधाने स्वकन्यारत्नं निजं चार्द्धराज्यं दत्तं । तथैवानेकहयगजरत्नमणिमाणिक्यस्वर्णादिभृतानि द्वात्रिंशत्प्रवहणान्यर्पितानि । कुत एतानि वस्तूनि यत्र गच्छन्ति तत्र शोभामेव प्राप्नुवन्ति ।

यतः-पूगीफलानि पत्राणि, राजहंसास्तुरंगमाः । स्थानभ्रष्टाः सुशोभन्ते, सिंहाः सत्पुरुषा गजाः ॥३५॥

अथैवंविधां तस्य समृद्धिं दृष्ट्वा स सागरदत्तश्रेष्ठी निजहृदि प्रज्वलितुं लग्नः । ततः स श्रेष्ठी निजशेषक्रयाणकानि विक्रीय तत्र-

स्वैर्नानाविधैरपरैः क्रयाणकैः प्रवहणान्यापूर्य पश्चान्मनसि मन्त्रिधनस्येर्ष्यया ज्वलन् स्वदेशीयस्तात्केनचिज्जनेन मंत्रिणमाकारयामास । यदा मंत्रिणापि निजश्वशुराय राज्ञे प्रोक्तं यदहं यास्यामि स्वदेशं, तदा पुना राज्ञाप्यर्द्धराज्यमूल्यप्रमाणानि स्वर्णमाणिक्यादिरत्नैर्भृत्वा अष्टौ प्रवहणानि तस्य समर्पितानि । ततः समुद्रतटं यावद्राजा तं प्रेषयितुं समायातः, तत्र राज्ञा स्वसुता सुष्ठुशिक्षया शिक्षिता तद्यथा– हे सुते! मदीयस्य जामातुश्च कुलस्य येन प्रकारेण शोभा भवेत्तेनैव प्रकारेण त्वया श्वश्रूश्वशुरयोर्ज्येष्ठपत्न्योश्च सुविनयः करणीयः । भर्तुरुक्त्यनुसारेणैव समस्तं कार्यञ्च कर्त्तव्यं, अनुचरवर्गातिथिप्रभृतीनां यथायोग्यमादरसम्मानौ च विधातव्यौ, सपत्न्या सार्कं स्वभगिनीतोऽप्यधिकतरप्रेम्णा वर्त्तितव्यं, किमहं बहूपदिशामि ? । तत्राखिलं शुभमेव विरचनीयमित्यादिकाः सुशिक्षाः सुतायै प्रदाय जामातरं च सम्यक् स्नेहेन संभाष्य संतोष्य च नृपः स्वस्थानमाजगाम । ततस्तौ मंत्रिव्यवहारिणौ समुद्रमध्ये चलितौ । अथ स श्रेष्ठी मंत्रिणो रत्नभृतानि प्रवहणानि रूपवतीं पत्नीं च दृष्ट्वा लोभदशां प्राप्तः सन् चिन्तयति स्म–अस्य मंत्रिणः पत्न्यादिसर्वसंपत्तिर्ममैव चेत्स्यात्तर्हि जगति मन्ये स्वजन्म कृतार्थम् । अतिलोभित्वेन तेनैवंविधं दुष्कर्म विचारितम् ।

यदुक्तं–कोहो पीइं पणासेइ, माणो विणयनासणो । माया मित्तिं पणासेइ, लोहो सव्वविणासणो ॥३६॥

अपिच–यद्दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं, गाहन्ते गहनं समुद्रमतनुक्लेशां कृषिं कुर्वते ।
सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसंचरं, सर्पन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥३७

पुनरेतादृशैः कुत्सितनरैरचलाप्यशुद्धा भवति तदुक्तं दृष्टान्तेन दर्शयति ।

यथा–हस्ते नरकपालं ते, मदिरामांसभक्षिणि ! । भ्रातुः पृच्छति मातङ्गी, किं तोयं दक्षिणे करे ? ॥३८।

साऽऽह–मित्रद्रोही कृतघ्नश्च, स्तेनो विश्वासघातकः । कदाचिच्चलितो मार्गे, तेनैवं क्षिप्यते हठा ॥ ३९ ॥

तथा च–पासा वेसा अग्गि जल, ठग ठकुर सोनार । ए दस होय न अप्पणा, दुज्जण सप्प बिलार ॥४०॥

अथ कपटेनैनं चेन्मारयामि तदैतत्सर्वमपि मे स्वाधीनं भवेदिति विचार्य तेन मंत्रिणा सहाऽधिका प्रीतिर्मण्डिता ।

यतः–ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति । भुंक्ते भोजयते चैव, षड्विधं प्रीतिलक्षणम् ॥ ४१ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः, क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं, युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥४२॥

अथैवं मैत्रीं दर्शयन्नेकदा तेन सागरदत्तेन मंत्रिणं प्रति प्रोक्तं–पृथक् पृथक् प्रवहणस्थयोरावयोः का प्रीतिः ? अतस्त्वं मम प्रवहणे समागच्छेति धूर्तश्रेष्ठिवचनरञ्जितः सरलस्वभावी मंत्री तद्यानपात्रे गतः । तदा सागरदत्तेनोक्तम्–यद्यावां वाहनप्रान्ते समुपविश्योच्छलज्जलधिकल्लोललीलां पश्यावस्तदा वरं, मंत्रिणापि तदंगीकृतं । अथावसरं प्राप्य लोभाभिभूतेन पापिना तेन सागरदत्तेन मंत्री समुद्रान्तः पातितः । मंत्रिणा तु पततैव पञ्चपरमेष्ठिनमस्कारस्मरणानुभावेन फलकं लब्धम् ।

यतः–संग्रामसागरकरीन्द्रभुजंगसिंह–दुर्व्याधिवह्निरिपुबन्धनसंभवानि ।
चौरग्रहभ्रमनिशाचरशाकिनीनां, नश्यन्ति पंचपरमेष्ठिपदैर्भयानि ॥ ४३॥

ततोऽनन्तरं सर्वाण्यपि प्रवहणानि स्वाग्रतो गतानि । अथ स दुष्टो मायावी सागरदत्तोऽतीवोच्चस्वरेण पूत्कारं कुर्वन् कूटशोकं च विधाय विलपन्त्या राजपुत्र्याः पार्श्वे समागत्य मायया विलपन् समुवाच–हे भद्रे चन्द्रवदने ! स मंत्री तु भृशं दयादाक्षि-

ण्यौदार्यगांभीर्यादिसद्गुणकलितोऽद्वितीयः परोपकारधारधुर्य उत्तमपुरुषश्चासीत्। अतएव मे मनस्यपि तद्वियोगजं महद्दुःखं भवति। अहमपि त्वदग्रे तद्दुःखं निवेदयितुमशक्योऽस्मि, परं भवितव्यता तु पुण्यशालिनां महापुरुषाणामपि नो दूरीभवति।

यतः—असंभवं हेममृगस्य जन्म, तथापि रामो लुलुभे मृगाय।
प्रायः समापन्नविपत्तिकाले, धियोऽपि पुंसां मलिना भवन्ति॥ ४४॥

न स प्रकारः कोऽप्यस्ति, येनेयं भवितव्यता। छायेव निजदेहस्य, लंघ्यते जातु जन्तुभिः॥ ४५॥

अपि च—पातालमाविशतु यातु सुरेन्द्रलोक-मारोहतु क्षितिधराधिपतिं सुमेरुम्।
मंत्रौषधैः प्रहरणैश्च करोतु रक्षां, यद्भावि तद्भवति नात्र विचारहेतुः॥ ४६॥

अथ समुद्रपतिते तस्मिन्नमात्ये चिन्ताकरणं तव नोचितं, चिन्तया किमपि हस्ते नैव समायाति तत्करणेन च कर्मबन्धोऽपि भवति।

यदुक्तम्—गते शोको न कर्त्तव्यो, भविष्यं नैव चिन्तयेत्। वर्तमानेन योगेन, वर्त्तन्ते हि विचक्षणाः॥४७॥

पुनरिमानि सद्गुणान्वितानि वस्तूनि यत्र यत्र गच्छन्ति तत्रादरमेव लभन्ते, ततस्त्वया कापि चिन्ता न विधेया।

यतः—शूराश्च कृतविद्याश्च, रूपवत्यश्च याः स्त्रियः। यत्र यत्र हि गच्छन्ति, तत्र तत्र कृतादराः॥ ४८॥

हे सुभगे! तेन यदि त्वं मदुक्तं करिष्यसि तदाहं त्वां निजसर्वकुटुम्बस्वामिनीं करिष्यामि। तस्यैवंविधवचनतस्तया चतुरया ज्ञातम्—नूनमनेनैव दुरात्मना लोभाभिभूतत्वेन कामान्धत्वेन च मम स्वामी समुद्रमध्ये पातितोऽस्ति। यदुक्तम्—

न पश्यति हि जात्यन्धः, क्षुधान्धो नैव पश्यति। न पश्यति मदोन्मत्तो, स्वार्थी दोषं न पश्यति॥४९॥

दिवा पश्यति नो घूकः, काको नक्तं न पश्यति । अपूर्वः कोऽपि कामान्धो, दिवानक्तं न पश्यति ॥ ५० ॥

किमु कुवलयनेत्राः सन्ति नो नाकिनार्य–स्त्रिदशपतिरहिल्यां तापसीं यत्सिषेवे ।

मनसि तृणकुटीरे दीप्यमाने स्मराग्ना–वुचितमनुचितं वा वेत्ति कः पण्डितोऽपि ॥ ५१ ॥

अपि च–विकलयति कलाकुशलं, तत्त्वविदं पंडितं विडम्बयति । अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥५२

अथ स्वशीलरक्षार्थं तयोक्तं–संप्रति मम दुःखं प्रदेते, अतो जलप्रभमनान्तरं विचिन्तयिष्यते, इति तद्वचसा सागरदत्तः स्वस्थो जातः । इतस्तस्य सागरदत्तश्रेष्ठिनः प्रवहणानि सुवायुना प्रेरितानि गंभीरपुरनगरे प्राप्तानि । तावत्सौभाग्यसुन्दरी स्वशीलरक्षार्थं प्रवहणादुत्तीर्य निकटस्थश्रीमदृषभदेवप्रासादमध्ये गत्वा तं देवं त्रिविनाऽऽरम्य कपाटे दत्त्वा च संस्थिता । उक्तं च तया यदि मम शीलप्रभावः स्यात्तर्हि मत्पतिं विना कपाटे मोद्घटेताम् । अथ सागरदत्तोऽपि तच्छीलमाहात्म्येन तां तत्रैव विस्मृत्य स्वगृहं गतः । इतो धर्मबुद्धिमन्त्री तु नमस्कारस्मरणप्रभावात्फलकं लब्ध्वा क्रमेण समुद्रतटं प्राप्तः । कुतस्तत्फलं शास्त्रेऽप्येवमुक्तम्—

जिणसासणस्स सारो, चउदसपुव्वाण जो समुद्धारो । जस्स मणे नमुक्कारो, संसारो तस्स किं कुणइ ? ॥५३॥

एसो मंगलनिलओ, भवविलओ सव्वसंतिजणओ य । नवकारपरममंतो, चिंतिअमत्तो सुहं देइ ॥५४॥

अप्पुव्वो कप्पतरू, एसो चिंतामणी अपुव्वो अ । जो झायइ सय कालं, सो पावइ सिवसुहं विउलं ॥५५॥

नवकारिक्क अक्खरो, पावं फेडेइ सत्त अयराणं । पण्णासं च पएणं, पंचसयाइं समग्गेणं ॥५६॥

जो गुणइ लक्खमेगं, पूएइ विहिणा य नमुक्कारं । तित्थयरनामगोयं, सो बंधइ नत्थि संदेहो ॥५७॥

तथा च—अट्ठेव य अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ। जो गुणइ भत्तिजुत्तो, सो पावइ सासयं ठाणं ॥५८॥

अथ सोऽमात्यः समुद्रतटादग्रे भ्रमन्सन् कमनीयतरमेकं नगरं शून्यं दूरतो ददर्श। ततः शनैः शनैर्नगरमध्यं प्रविशन् सोऽनेकमणिमाणिक्यरत्नविद्रुममौक्तिकस्वर्णादिविविधवस्तुक्रयाणकापूर्णापणश्रेणीं सतोरणां मन्दिरश्रेणीं चालोक्य मनसि बाढं चमच्चकार। साहसैनैकाक्येव नगरमध्ये व्रजन् स राजमन्दिरे सप्तमभूमिकोपरि गतः। तत्र खट्वोपर्येकामुष्ट्रिकां तथैव च तत्र स कृष्णश्वेताञ्जनभृतं कूपिकाद्वयं ददर्श। तद् दृष्ट्वा विस्मितः सन् सकौतुकं श्वेतांजनेनोष्ट्रिकाया नयनेऽञ्जनं चकार, तत्प्रभावाच्च सा दिव्यरूपा मानुषी जज्ञे। तत्क्षणमेव तस्मै तयाऽऽसनं दत्तं, ततो मंत्रिणा सा पृष्टा—अयि चन्द्रवदने! क्व त्वं? कस्य च सुता? कथमेकाकिनी ते दृष्टा? किमिदं नगरं? कुतः कारणाच्च शून्यं वर्तते? इति श्रुत्वा सा कन्या निजनेत्राभ्यामश्रुपातं कुर्वती प्राह—भो नरपुंगव! त्वमितः शीघ्रं याहि २, यतोऽत्रैका राक्षसी विद्यते, सा यदि द्रक्ष्यति तर्हि त्वां भक्षयिष्यति। तदा मंत्रिणा पुनरपि पृष्टा—हे सुलोचने! सा का राक्षसी इत्यादि समस्तं वृत्तान्तं त्वं स्पष्टतरं कथय। साऽऽह—हे पुरुषोत्तम! त्वं शृणु-अस्य नगरस्य स्वामी भीमसेनो राजाऽहं च तत्पुत्री रत्नसुन्दरीनाम्नी स मे पिता तु तापसभक्त आसीत्। एकदा कश्चित्तपस्वी मासोपवासी अस्मिन्नगरे समागतवान्, स च मत्पित्रा भोजनाय निमंत्रितः, अहं च राज्ञा तस्य परिवेषणायाऽऽदिष्टा। ततस्स मद्रूपं दृष्ट्वा चुक्षोभ, रात्रौ च मत्समीपे तस्करवृत्त्या समागच्छन् स प्राहरिकैर्धृत्वा बद्धः, प्रातश्च नृपस्य समर्पितः, राज्ञा च स शूल्यामारोपितः, तेनार्तध्यानेन स मृत्वा राक्षसी बभूव। तथा चेदं नगरमुद्वासितं विधाय पूर्ववैरेण राजापि व्यापादितः, तद् दृष्ट्वा नगरलोकास्सर्वेऽपि भयभ्रान्ताः पलायनं चक्रुरिति नगरं शून्यं जातं। पूर्वभवमहामोहभावतोऽहं तथैवं रक्षिता, कृष्णाञ्जनेनोष्ट्रीरूपेण स्थापिता, प्रतिदिनं च सा राक्षसी मत्सत्कारशुश्रूषाकरणार्थमत्र समाग-

च्छति, अतस्त्वं प्रच्छन्नो भव, यतः सा राक्षसी संप्रत्येव समागमिष्यति । पुनरेकदा सा राक्षसी मया पृष्टा–हे मातः! अहमत्रारण्यसदृशे सौधेऽप्येकाकिनी किं करोमि ? । अतस्त्वं मां मारय तर्हि सुन्दरतरं भवेत् । ततस्तयोक्तं–यदि योग्यं वरमहं लप्स्ये तदा तस्मै त्वां दास्यामि, हे सत्पुरुष ! पूर्वमहमेवं तया निगदितास्मि । अथ सांप्रतं तदागमनवेलास्ति सा च कदाचिन्मां तुभ्यं दद्यात्तदा त्वयास्या राक्षस्याः पार्श्वादाकाशगामिनी विद्या, सप्रभावा खट्वा, महार्घ्यदिव्यरत्नग्रन्थी, सप्रभावे श्वेतरक्तकरवीरकंबिके चैतानि वस्तूनि मार्गणीयानि करमोचनावसरे, इति तदुक्तसंकेतं गृहीत्वा पुनस्तां कृष्णाञ्जनेनोष्ट्रिकां विधाय मंत्री प्रच्छन्नः स्थितः । इतश्च मनुष्यं भक्षयामीति वदन्ती राक्षसी समागता, तया च श्वेताञ्जनेन सोष्ट्रिका कन्या चक्रे, ततस्तया राक्षस्या सार्कं वार्तां कुर्वत्या स्वयोग्यो वरो याचितः । तदा राक्षस्योक्तम्–क्वापि तव योग्यं वरं दृष्ट्वा तस्मै त्वां दास्यामि ।

यदुक्तं–मूर्खनिर्धनदूरस्थ–शूरमोक्षाभिलाषिणाम् । त्रिगुणाधिकवर्षाणां, नापि देया न कन्यका ॥५९॥

बधिरक्लीबमूकानां, खंजान्धजडचेतसाम् । सहसा घातकर्तॄणां, नूनं देया न कन्यका ॥ ६० ॥

कुलजातिविहीनानां, पितृमातृवियोगिनाम् । गेहिनीपुत्रयुक्तानां, नूनं देया न कन्यका ॥६१॥

सदैवोत्पन्नभोक्तॄणा–मालस्यवशवर्तिनाम् । बहुवैराग्ययुक्तानां, नूनं देया न कन्यका ॥ ६२ ॥

अतः सुकुलजायुत्पन्नसत्पितृभ्यामुभयलोकशुभेच्छयैतान् गुणान् विलोक्यैव सुता प्रदेया ।

यथा–कुलं च शीलं च सनाथता च, विद्या च वित्तं च वपुर्वयश्च ।
वरे गुणाः सप्त विलोकनीया–स्ततःपरं भाग्यवशा हि कन्या ॥ ६३ ॥

इति तद्वचो निशम्य कन्यकयोक्तं–अहं स्वयमेव स्वयोग्यं वरं दर्शयामि, राक्षस्योक्तं–तर्ह्यधुनैव त्वां तस्मै ददामि। ततः पूर्वसंकेततस्तदैव मंत्री प्रकटीबभूव, राक्षस्यापि तया सह गांधर्वविवाहेन स परिणायितः। करमोचनावसरे च खट्वादिवस्तुचतुष्टयं तेन याचितं, तयापि च तत्सर्वं तस्मै समर्पितं। अथैकदा राक्षसी क्रीडार्थमन्यत्र जगाम, तदा तया कन्यया मंत्र्यूचे–हे प्राणवल्लभ! स्वामिन्! इदानीमावां स्वस्थानं गच्छावस्तदा वरम्। मंत्रिणोक्तं–कथं गम्यते स्वपुरादिमार्गाऽपरिज्ञानात्? ततस्तयोक्तं–सांप्रत–मावाभ्यां रत्नग्रंथिद्वयं गृहीत्वा खट्वायां चोपविश्य श्वेतकरवीरकम्ब्या साऽऽहन्तव्या। ततः सा चिन्तिते पुरे नेष्यति, यदि च कदा-चिद्राक्षसी पृष्ठे समागच्छेत्तदा त्वया सा रक्तकरवीरकंब्या हन्तव्या, ततः सा निष्प्रभावा सती पश्चाद्यास्यति। अथैवं परस्परं विमृश्य चेलतुः, तयोश्चलनानन्तरं सा राक्षसी तत्र समागता स्वस्थानं च शून्यं दृष्ट्वोवाच–हा! मुषितास्मीति चिन्तयन्ती सा तयोः पृष्ठे धाविता मिलिता च। मंत्रिणा रक्तकरवीरकंब्या निहता सती पश्चान्निष्प्रभावा स्वस्थानं जगाम। ततो यत्र गंभीरपुरपत्तने तस्य द्वे प्राक्तने भार्ये आस्तां, तस्मिन्नेव पुरे उद्यानवनमध्ये खट्वाप्रभावान्मंत्री समागात्। तत्रैव रमणीयतरवनमध्ये स्वस्त्रीं रत्नसुन्दरीं वहिर्मुक्त्वा स मंत्री निवासस्थानविलोकनार्थं नगरान्तर्गतः। इतस्तन्नगरवास्तव्यैका कपटकलाकलापकुशला वेश्या समागता, तया तामतिचारुरूपां मंत्रिस्त्रीं दृष्ट्वा चित्ते चिन्तयामास–किमियं स्वर्गाद्भुवमत्र समागता स्ववधूः? वा मंत्रसाधनसोद्यमा विद्याधरी? विषोद्विग्ना ह्यत्रागता किं वा पातालकन्येयं? रतिरिन्द्राणी पार्वती हरिप्रिया वेति? पुनस्तया ध्यातम्–यद्येषाऽस्मद्गृहे समा-गच्छेत्तर्हि मम महत्तरं भाग्यं फलेत्, पुनरंगणे गजगामिनी जगदानन्ददायिनी चारुकल्पवल्लीवाऽऽरोपिता भवेत्। अतः केना-प्युपायेनैषा ग्राह्येति विमृश्य तत्पार्श्वे समागत्य सा तां प्रति वदति स्म।

यथा-भद्रे! कासि सुरांगना किमथवा विद्याधरी किन्नरी, किं वा नागकुमारिका बुधसुता किं वा महेशप्रिया ?।
पौलोमी किमु चक्रवर्तिदयिता तीर्थाधिपोऽङ्गनाम्?, शापात्कुम्भमुनीश्वरस्य वचसा त्वं कानने दृश्यसे ६४

अथ वत्से ! त्वं सत्यं सत्यं ब्रूहि कस्य पत्नी कुतश्चागता क ते भर्तेति पृष्टा सती सा तदग्रे यथास्थितं निजस्वरूपं जगाद । तदा कपटपाटवोपेतया वेश्यया कथितं तर्हि त्वं मद्भ्रातृजायासि कथमत्र स्थिता ? मन्त्री तु मदालयं प्राप्तस्तेनैवाहं त्वदाह्वानार्थं प्रेषितास्मि, ततस्त्वमेहि मया सार्कं मे मंदिरे, ततः सा सरलस्वभावतया तन्मधुरवाक्यप्रपञ्चवञ्चिता तदैव तद्गृहं गता ।

यतः-मायया हि महापापै-र्वञ्च्यते सरलो जनः । मत्स्यः समुद्रमध्यस्थो, धीवरैर्बध्यते यथा ॥ ६५ ॥

तथा च-द्यूतकारे नटे धूर्ते, वेश्यायां च विशेषतः । माया कृत्वा निजावासं, स्थितास्ति खलु शाश्वती ६६

अतः सर्वत्र पुरुषैः सरलस्वभावो नैव रक्षणीयः, किन्तु यथावसरं यथास्थानमेव सर्वत्र सुबुद्धिचातुर्यं करणीयम् ।

यतः-नात्यन्तं सरलैर्भाव्यं, गत्वा पश्य वनस्थलीम् । सरलास्तत्र छिद्यन्ते, कुब्जास्तिष्ठन्ति पादपाः ॥६७॥

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने, प्रीतिः साधुजने नयो नृपजने विद्वज्जनेष्वार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता, ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥६८॥

अथ नानादेशान्तरायातलोकैर्लीलाविलासकलाकुशलैः कामिनीनयनानन्ददायकैरभिभृतं मनोज्ञतोरणैः पञ्चशतैर्वातायनैर्युतं धन्याभिः शतपंचभिर्वरकन्याभिः पूरितमेवंविधं महासौधममरागारसन्निभं गीतनृत्यादिध्वनिगुञ्जितं रत्नसुन्दर्यैक्षत, तया गणिकया च

सा निजावासससमभूमौ स्थापिता। अथ सा वेश्यां प्रति पृच्छति स्म–क मे भर्ता ? सा प्राह–बहवोऽत्र ते भर्तारः समायास्यन्ति। ये राजानो राजपुत्राः मण्डलाधिपाः श्रेष्ठिनः सार्थवाहाश्च ते त्वत्किंकरा भविष्यन्ति। छत्रचामरवादित्रसुखासनहयगजान् तवाज्ञावशवर्तिनो राजान आनयिष्यन्ति। मनोज्ञतरा नवनवास्तेऽत्र सत्कामभोगा भविष्यन्ति, हे मृगेक्षणे ! किं बहुना ? तव पदाम्बुजे नवनवा नराः सदैव पतिष्यन्ति, त्वया नेत्रविभागेन दृष्टाः सुरासुरसेविता मुनयोऽपि वशवर्त्तिनो भविष्यन्ति। हे सुभगे ! किं बहूक्तेन ? नरत्वेऽपि मनसा चिन्तितं सर्वं देववत्ते भविष्यति, इत्याद्युक्त्वा तया सर्वोऽपि स्वकुलाचारः प्रदर्शितः। तदा मंत्रिपत्न्या चिन्तितम्–उ एतत्तु गणिकालयं, हा ! मयाथास्मिन् वेश्यागृहे पतिं विना सर्वोत्तमं भूषणरूपं स्वशीलं कथं रक्षणीयम् ?।

तदुक्तं सत्फलं–शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणं, शीलं ह्यप्रतिपाति वित्तमनघं शीलं सुगत्यावहम्।
शीलं दुर्गतिनाशनं सुविपुलं शीलं यशः पावनं, शीलं निर्वृतिहेत्वनन्तसुखदं शीलन्तु कल्पद्रुमः ॥६९॥
शीलं सर्वगुणौघमस्तकमणिः शीलं विपद्रक्षणं, शीलं भूषणमुज्ज्वलं मुनिजनैः शीलं समासेवितम्।
दुर्वाराधिकदुःखवह्निशमने प्रावृट्पयोदाधिकं, शीलं सर्वसुखैककारणमतः कस्याऽस्ति नो सम्मतम् ? ॥७०॥

अपि च—व्याघ्रव्यालजलानलादिविपदस्तेषां व्रजन्ति क्षयं, कल्याणानि समुल्लसंति विबुधाः सान्निध्यमध्यासते।
कीर्तिः स्फूर्तिमियर्ति यात्युपचयं धर्मः प्रणश्यत्यघं, स्वर्निर्वाणसुखानि संनिदधते ये शीलमाबिभ्रते॥७१॥

अथ तया स्वशीलभंगभयात्कश्चिदपवरकं प्रविश्य कपाटे दत्ते, तच्छीलप्रभावाच्च ते कथमपि नैव समुद्घटिते। अथ प्राक्परि-

णीता मंत्रिपत्नी सा विनयसुन्दर्यपि श्रीदत्तकुंभकारगृहस्थिता, केनापि कामिना राजपुत्रेण हास्यादिना पराभूता सती, स्वशीलरक्षार्थं साध्वी तथैव कपाटे पिधाय स्थिताऽऽसीत् । इतोऽयं व्यतिकरो राजलोकसकाशाद्राज्ञा ज्ञातः, ततः स्वनगरानर्थभीतेन राज्ञा पटहोद्घोषणा कारिता - यः कश्चिदेतत्कपाटत्रयमुद्घाटयिष्यति, [illegible] च वादयिष्यति, तस्य राजा स्वराज्यार्द्धं राजकन्यां च दास्यति । इतः स मंत्री निजनिवासार्थं स्थानं विलोक्य भोजनं च गृहीत्वा यावत्तत्रोपवने समागतस्तावत्तत्र तेन निजस्त्री रत्नसुन्दरी नावलोकिता । तदैतस्ततस्तद्वने विलोकितापि परं क्वापि सा न लब्धेति विह्वलः सन् स नगरमध्ये परिबभ्राम । इतस्तेन सा पटहोद्घोषणा श्रुता मनसि सर्वं स्वव्यतिकरं च विज्ञाय पटहं स्पृष्ट्वा बहुजनपरिवृतो मंत्री कुंभकारगृहे समागतः । तत्र च द्वारपार्श्वे समागत्य तेन श्रीपुरनगरनिर्गमनकालादारभ्य गंभीरपुरप्राप्तिविनयसुन्दरीदेवकुलमोचनावधिः सर्वोऽपि वृत्तान्तो निगदितः । तन्निशम्य शीघ्रं विनयसुन्दर्या कपाटे समुद्घाटिते, तयोपलक्षितश्च मंत्री । ततः श्रीयुगादिदेवप्रासादे समागत्य प्रवहणचलनकालादारभ्य समुद्रान्तःपतनं यावत्तेन संबन्धः प्रोक्तः । तदा सौभाग्यसुन्दर्यपि स्वपतिमुपलक्ष्य कपाटे समुद्घाटिते । ततो मंत्री गणिकाया गृहे समागत्य सफलकप्राप्ति—समुद्रतरणादारभ्य तद्गंभीरपुरप्राप्तिनिवासस्थानविलोकनभोजनग्रहणनिमित्तं नगरमध्यागमनं यावद् वृत्तान्तमुक्तवान् । तदा तया तृतीयया रत्नसुन्दर्यापि तथैव मंत्रिणमुपलक्ष्य कपाटे समुद्घाटिते । ततस्तास्तिस्रोऽपि भार्याः स्वस्ववृत्तान्तं मंत्रिणे कथयामासुः । ततः प्रमुदितेन राज्ञापि निजराज्यार्द्धं स्वकन्यां शीलसुन्दरीं च मंत्रिणे दत्त्वा साश्चर्यं पृष्टम्—भवानब्धौ कथं निपतित इति ? मया तु तवातिचातुर्यं विलोक्यते, अतोऽहमेवं संभावयामि केनचिदन्येन कपटिदुष्टेन निपातितो भविष्यतीति । अथ त्वं स्वं यथाभूतं वृत्तं तथा निगद, तन्निशम्याहं तद्योग्यं दण्डं दास्यामि, येनाग्रे कोऽप्यन्यो दुष्टात्मैवंविधमकार्यं न कुर्यात् । तादृशानि राज्ञो वचनान्याकर्ण्य

करुणापरो मंत्री किंचिन्मौनमवलंब्योक्तवान्, हे राजन्नहं स्वात्मनोऽसावधानत्वेनैव निपतितः। यत उक्तं महतां कोऽप्यशुभं कुर्यात्तथापि ते तु तस्य शुभमेव कुर्वन्ति। यतः—

सुजनो न याति विकृतिं, परहितनिरतो विनाशकालेऽपि। छेदेऽपि चन्दनतरुः, सुरभयति मुखं कुठारस्य ॥७२॥

ततो राज्ञात्याग्रहेणाभिहितं—यद् भूतं वृत्तं तत्सर्वं त्वया वक्तव्यमेव भविष्यतीत्यादि बह्वाग्रहिकं राज्ञो वचनं निशम्य मनसि तु कथनस्य भावो नासीत्तथाप्यतीवाग्रहतो मंत्रिणा किंचिन्मात्रमेव सागरदत्तश्रेष्ठिवृत्तं राज्ञे निवेदितं, परं राज्ञा तु स्वल्पोक्तेनैव बुद्धिकौशल्यात्सर्वं ज्ञातम्। तदनु तद्भिन्नानाधारानीत्यादिकार्यतो भृशं क्रोधातुरेण राज्ञा तत्क्षण एव श्रेष्ठिनमाहूयोक्तं—रे दुष्ट! परधनस्त्रीलोलुपेन सता त्वयैवंविधानि घोरपातकानि क्रियन्ते। एवं बहुधा निन्दानिर्भर्त्सनादिधिक्कारवाग्भिर्निर्भर्त्स्य तत्सकाशान्मंत्रिधनं मंत्रिणे प्रदापितम्। ततोऽन्यायकारिणे तस्मै चौरदंडं दातुं लग्नस्तदा दयालुनाऽमात्येन नृपतिपादयोर्लगित्वोक्तम्—हे राजन्नेष मे महोपकारी, एतत्प्रभावेणैवात्र भवत्पार्श्वे समेत्य यद्भवदीयांगजा मया परिणीताऽयं सर्वोऽप्यस्यैव प्रभावः। इत्याद्युक्त्वा स जीवन्मोचितः, कुतो महतामिमान्येव लक्षणानि। तदुक्तं च—

चेतः सार्द्रतरं वचः सुमधुरं दृष्टिः प्रसन्नोज्ज्वला, शक्तिः क्षान्तियुता मतिः श्रितनया श्रीर्दीनदैन्यापहा।
रूपं शीलयुतं श्रुतं गतमदं स्वामित्वमुत्सेकता—निर्मुक्तं प्रकटान्यहो! नवसुधाकुण्डान्यमून्युत्तमे ॥७३॥

अनेन कारणेन प्रत्युत सत्कारसम्मानदानपुरस्सरं मन्त्री तं सागरदत्तश्रेष्ठिनं स्वस्थाने प्रेषयामास। अथ मंत्री तामिश्रतसूमि-

जायाभिः सह दोगुन्दुकदेववद्विषयसुखान्युपभुंजानस्तत्र कियन्ति दिनानि सुखेनास्थात् । अथैकदा पाश्चात्यरात्रौ स धर्मबुद्धिर्मन्त्री नित्यधर्मकर्मसाधनाय जागरितः सन् सुभावेन तद्विधाय पश्चान्मनसि विचारयामास—अथ श्वशुरालये संतिष्ठमानस्य मे बहूनि दिनानि व्यतीयुः । अतःपरमत्र निवासो मे गर्हणीयो हास्यहेतुर्लोकविरुद्धापमाननिलयश्चातएवायुक्तोऽस्ति ।

यतः—श्वशुरगृहनिवासः स्वर्गतुल्यो नराणां, यदि वसति विवेकी पंचषड्वासराणि ।
दधिगुडघृतलोभान्मासयुग्मं वसेचेत्, स भवति खरतुल्यो मानवो मानहीनः ॥ ७४ ॥

तथा च—हविर्विना रविर्यातो, विना पीठेन केसरः । कदन्नात्पुण्डरीकाख्यो, गलहस्तेन घोघरः ॥ ७४ ॥

इत्यादि विचार्य पुनर्मत्प्रतिज्ञापि सम्यक् पूर्णाऽजन्यतो मया प्रातः श्वशुरादेशं समभिगृह्य स्वदेशं प्रति गन्तव्यमेव । ततो निशान्तरं प्रातःकाले मंत्री स्वविचारानुक्रममखिलं विधाय ततोऽर्द्धराज्यसंपत्ति स्त्रीचतुष्टयं चादाय हयगजरथपत्त्यादिभिर्वारिधिपूर इव पापबुद्धिनामानं राजानं पराभवितुं श्रीपुरं नगरं प्रति चलितः । मार्गे समागच्छन् राजसमूहैरुपहारपूर्वकं वन्द्यमानः पूज्यमानश्चानुक्रमेण श्रीपुरनगरसमीपे समागतवान् । एवं तमागच्छन्तं विज्ञाय पूर्लोका व्याकुलाः समजायन्त, राजापि परचक्रमागतं विदित्वा प्राकारं सज्जीकृत्यान्तः स्थितः । अथ मंत्रिणा सन्ध्याकाले पापबुद्धिराजस्यान्तिके दूतः प्रेषितः स कीदृशः ।

यथा—मेधावी वाक्पटुः प्राज्ञः,परचित्तोपलक्षकः । धीरो यथोक्तवादी च, एष दूतो विधीयते ॥ ७५ ॥

सोऽप्यागत्याद्भुतवाण्या तमेवं जगाद—अये राजन् ! महाप्रतापवान्मेऽधिपतिस्तदग्रे न कोऽपि शक्तिशाली स्थातुं शक्तोऽस्ति प्रतिदिनं तस्य तेजोऽधिकत्वं यातीति जाने न क्यापि जनन्यैतत्समोऽन्यो जगति प्रसूतः । यस्तस्योक्तं नांगीकरोति तस्य हिमानी-

च वनखण्डं समस्तं राज्यादिकं दहति । क ईदृग्योद्धाऽस्ति यस्तस्य प्रतापं सहेत ? येन मत्स्वामिनोऽग्रे गर्वः कृतस्तस्य सर्वोऽपि गर्वस्त्वेन प्रभञ्जितः। कः कृष्णभुजंगं सिंहश्चाऽऽलिंग्य स्वमृत्युं दर्शयेत् ? अतएव त्वया तत्र गत्वा तेन साकं सन्धिरेव विधेयः। अन्यथा योद्धव्यं, इत्थमेव स्वामिना समादिष्टोऽस्मि च तत्त्वत्समीपेऽहं वच्मि। एतद्यदि ते प्रमाणं तर्हि रणभूमौ गन्तव्यमेव, अन्यथा तृणं दन्ताग्रे निवेश्य पुराद्बहिर्निर्गन्तव्यम्। एवं दूतोक्तमाकर्ण्य कृतभ्रुकुटिललाटो रक्तीकृतनेत्रः श्रीपुराधीशः पापबुद्धिनृपो जगाद–क्षत्रियोऽहमस्मि मरणे त्वेकवारमस्त्येवेति कथमहं सर्वं प्राक्तनं यशो विनाशं नयामि ? । अरे हे दूतेश ! यथाग्नौ शलभः स्वयमेव निपत्य विनश्यति, तथा ते स्वामिनाप्ययं स्वयमेव मृत्युपटहो वादितः । तस्मात्कथमेष कुशलपूर्वकं स्वगृहं समेष्यति ? अरे ! गच्छ शीघ्रं स्वस्वामिने निवेदय–यदि ते राजा रणार्थमुद्यतो रणभूमौ समागमनेच्छुः, पुनः सूर्योदय एव रणकरणमर्यादा तेन ते स्वामिना स्थापिताऽस्ति, तर्हि तस्य यद्बलवाहनं तत्सर्वं संगृह्य तेन त्वरितं समागन्तव्यं नात्र विलम्बः करणीयः । मया चैतानि गोपुराणि निशाकाले नगररक्षार्थं पिहितानि, प्रातरुद्घाट्य रणतूर्यवादनपूर्वकं तेन समं सम्यग् योत्स्ये। इत्थं पापबुद्धिराजवाक्यं निशम्य शीघ्रमेवागत्य दूतेन स सर्वोऽप्युदन्तो निजराजानं प्रति निगदितः । अथ पापबुद्धी राजा प्रातश्चतुरंगिणीं सेनां सज्जीकृत्य स्वपुराद्बहिर्निर्गतः, परं मार्गेऽपशकुनं जातं तथापि मदोन्मत्तस्स न तद्गणयामास, यतो गर्ववशेन कुपुरुषो जनैर्हास्ययोग्यं वृथा कार्यं किं न करोति ?

यतः—उत्क्षिप्य टिट्टिभः पाद–मास्ते भंगभयाद्भुवः । स्वचित्तकल्पितो गर्वः, क्वाङ्गिनां नोपयुज्यते ?॥ ७६ ॥

तथा च—विषभारसहस्रेण, वासुकिर्नैव गर्जति । वृश्चिकस्तृणमात्रेण–प्यूर्ध्वं वहति कंटकम् ॥ ७७ ॥

ततो यत्र मंत्रिसैन्यमवस्थितं तत्र सोऽपि गतोऽविलम्बेनैव, यतोऽहंकार्येवं नैव विचारयति।

यथा–बलिभ्यो बलिनः सन्ति, वादिभ्यः सन्ति वादिनः। धनिभ्यो धनिनः सन्ति, तस्माद्दर्पं त्यजेद् बुधः॥७८॥

अथ मध्ये युद्धमारोप्य भटाः प्रतिभटा अन्योन्यमभिमुखीबभूवुः, रणतौर्यत्रिकं च वादितम्। तदनन्तरं महाशूरताभिमानेन वै उभये युद्धमारेभिरे। तद्यथा–हस्तिभिर्हस्तिनः, वाजिभिर्वाजिनः, पत्तिभिः पत्तयो, रथिभी रथिनो, नालगोलिभिर्नालगोलिनः संघट्टितास्तेनोच्छलिता रजोराजिरादित्यं निस्तेजसं चकार। हस्तिनश्च तत्र वारिवाहा इव जगर्ज्जुः, विद्युत्पाता इव कृपाणप्रहारा जाताः, शिलीमुखाश्च जलधारा इवाऽवर्षन्, जलप्रवाह इव रक्तप्रवाहः प्रससार, तत्र रणसंमुखे ये कातरास्ते सर्वेऽपि निस्तेजसः सन्तो वर्षाकाल इन्द्रयवा इव पर्यशुष्यन्, रक्तपातेन सकर्दमा मही च संजाता। रजःपूरेणाऽम्बरं प्रच्छादितं, तदा किमयं वर्षाकाल आगत इति लोकाः संशयं चक्रुः?। ये सुभटास्ते सिंहनादं कुर्वन्ति स्म, तेनाऽन्यजनकृतः शब्दो न श्रूयते स्म। या निर्नाथका अप्सरसस्ताः सर्वा अपि नाथमभिलषन्त्यो विमान आसीनास्तत्र समाजग्मुः, यतो रणे मृतानां स्वर्गोत्पत्तिरित्युक्तत्वात्। रोषाऽतिशयेनैवं युद्ध्यमानास्ते पापबुद्धिसुभटा मतिसागरसुरभटैरन्ते त्वरितमेव पराजिताः। ततः पापबुद्धी राजा च तत्सुभटगणमध्य एव बद्धः। अथ मन्त्री राजानं प्रति पृच्छति स्म–किं भवान्मामुपलक्षयति? तदा राजा कथयति स्म–भास्करमिव तेजस्विनं भवन्तं को न जानाति?, ततः पुनर्मन्त्री कथयति स्म–एतदहं नो पृच्छामि किन्तु कोऽस्म्यहमिति पृच्छामि, तदा राजा नाहं जानामीति प्रत्युवाच। ततः सचिवेनोक्तं श्रूयताम्–हे राजन्! सोऽहं धर्मबुद्धिनामा भवन्मन्त्री विदेशात्परावृत्य धर्मफलप्रदर्शनार्थं भवदग्रे समाग-

तोऽस्मि। पुनर्मन्त्री साञ्जलिरुचे–हे राजन्! कथय- धर्मो निरंतरं सत्फलदायकोऽस्ति नवेति? श्रूयताम्–धर्मेत एव निखिललक्ष्मीलाभः सर्वा आशा च मे परिपूर्णा जाता। एवं द्वितीयवारमपि विदेशे गत्वा धर्मफलं प्रदर्श्य तेन मंत्रिणा स राजा जैनधर्मे दृढीकृतस्ततस्तेन कुबेरेणापि दुर्लभो [illegible] भवाम्भोधितरणतारणतरिरूपा जिनाज्ञैव सहर्षमंगीकृता, तत्क्षण एव मंत्रिणा बन्धनान्मुक्तो राजा हर्षरोमाञ्चितः तत्र सम्यगवीवदत् । अहो! कथंभूतमिदमाश्चर्यजनकं मंत्रिणः सौजन्यं, यद्राज्ञो धर्मिकरणाय देशान्तरं गतः ! नानाविधानि दुःखानि च समवलोकितानि, परमवसाने तु तेन राजानं धर्मिणं विधायैव मुक्तः। एवंभूतस्वभाववन्तः परोपकारिणः सज्जना अस्मिन् लोके विरला एव भवन्ति ।

उक्तञ्च–शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे। साधवो नहि सर्वत्र, चन्दनं न वने वने ॥७९॥

उपकर्तुं प्रियं वक्तुं, कर्तुं स्नेहमकृत्रिमम्। सज्जनानां स्वभावोऽयं, केनेन्दुः शिशिरीकृतः? ॥८०॥

तथा च---अपेक्षन्ते न च स्नेहं, न पात्रं न दशान्तरम्। सदा लोकहितासक्ता, रत्नदीपा इवोत्तमाः ॥ ८१ ॥

ततस्तयोः परस्परं परममैत्री संजाता, अतएव सम्यक्तया द्वावपि धर्मध्यानमेकमनसौ सन्तौ चक्रतुः। पुनस्तत्रैव नगरे सुखेन तौ राज्यं पालयामासतुः। अथ कियता कालेन केवलज्ञानिनं सन्मुनिं वनपालमुखादुपवने समवसृतं श्रुत्वा नृपसचिवादयस्तस्य वन्दनार्थं समागताः। तत्र केवलिमुनिनाप्येवं संसारार्णवतारिणी विषयकषायमोहाज्ञानतिमिरविदारिणी धर्मदेशना प्रारब्धा ।

यथा–त्रैकाल्यं जिनपूजनं प्रतिदिनं संघस्य संमाननं, स्वाध्यायो गुरुसेवनं च विधिना दानं तथाऽऽवश्यकम्।
शक्त्या च व्रतपालनं वरतपो ज्ञानस्य पाठस्तथा, सैष श्रावकपुंगवस्य कथितो धर्मो जिनेन्द्रागमे ॥८२॥

अपि च–यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा, यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्, प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ? ॥८३॥
पुनर्हे भव्याः ! कालोऽयमनादिकालतोऽनन्तप्राणिनो भक्षयन्नपि कदाचित्सौहित्यमलभमानोऽद्यपर्यन्तमपि संसारे प्रतिक्षणं प्राणिनामायुष्यं हरति ।
यतः–आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं गतं, तस्यार्द्धस्य कदाचिदर्धमधिकं वृद्धत्वबाल्ये गतम् ।
शेषं व्याधिवियोगशोकमदनासेवादिभिर्नीयते । देहे वारितरङ्गचंचलतरे धर्मः कुतः प्राणिनाम् ? ॥८४॥
तस्य कालस्याऽग्रे तीर्थंकरचक्रवर्तिबलदेववासुदेवप्रतिवासुदेवादिसर्वशक्तिमद्देवानामपि बलं न प्रचलति ।
यतः–नो विद्या न च भेषजं न च पिता नो बान्धवा नो सुताः, नाभीष्टा कुलदेवता न जननी स्नेहानुबन्धान्विताः।
नार्थो न स्वजनो न वा परिजनः शारीरिकं नो बलं, नो शक्ताः श्वशुरः स्वसा सुरवराः सन्धातुमायुर्ध्रुवम् ८५
अतोऽयं महतो महानुभावानपि प्राणिनो भक्षयति । पुनस्तदग्रेऽन्येषां पामरप्राणिनां का गणना ? तदुक्तञ्च–
ये पातालनिवासिनोऽसुरगणा ये स्वैरिणो व्यन्तरा, ये ज्योतिष्कविमानवासिविबुधास्तारान्तचंद्रादयः ।
सौधर्मादिसुरालये सुरगणा ये चापि वैमानिका–स्ते सर्वेऽपि कृतान्तवासमवशा गच्छन्ति किं शोच्यते ? ८६
दिव्यज्ञानयुता जगत्त्रयनुताः शौर्यान्विताः सत्कृताः, देवेन्द्राः सुरवृन्दवन्द्यचरणाः सद्विक्रमाश्चक्रिणः ।
वैकुण्ठा बलशालिनो हलधरा ये रावणाद्याः परे, ते कीनाशमुखं विशन्त्यशरणा यद्वा न लंघ्यो विधिः ८७

अस्मिन्काले समागते सर्वोत्तमा अपि निजसम्पदोऽत्रैवाऽवतिष्ठन्ते, पुनरेकाक्येव जीवः सर्वमपहाय परलोकमार्गं गच्छति ।

तदुक्तञ्च-एतानि तानि नवयौवनगर्वितानि, मिष्टान्नपानशयनासनलालितानि ।
हारार्द्धहारमणिनूपुरमण्डितानि, भूमौ लुठन्ति किल तानि कलेवराणि ॥ ८८ ॥

अपि च-चेतोहरा युवतयः स्वजनोऽनुकूलः, सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
गर्जन्ति दन्तिनिवहास्तरलास्तुरंगाः, सम्मीलने नयनयोर्नहि किञ्चिदस्ति ॥ ८९ ॥

पुनरप्यस्मिन्संसारे कतिपयेऽज्ञाः सुखं मत्वा संतिष्ठन्ते, परं शोकचिन्तादुःखादिदोषपरिपूर्णेऽत्र संसारे किं किमपि सुखमस्ति ? ।

यतः-दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे गर्भवासे नराणां, बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयःपानमिश्रम् ।
तारुण्ये चाऽपि दुःखं भवति विरहजं वृद्धभावोऽप्यसारः, संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित्

निर्द्रव्यो धनचिन्तया धनपतिस्तद्रक्षणे चाकुलो, निःस्त्रीकस्तदुपायसंगतमतिः श्रीमानपत्येच्छया ।
प्राप्तस्तान्यखिलान्यपीह सततं रोगैः पराभूयते, जीवः कोऽपि कथंचनाऽपि नियतं प्रायः सदा दुःखितः ९१

तथा च-दारिद्र्याकुलचेतसां सुतसुताभार्यादिचिन्ताजुषां, नित्यं दुर्भरदेहपोषणकृते रात्रिंदिवं खिद्यताम् ।
राजाज्ञाप्रतिपालनोद्यतधियां विश्राममुक्तात्मनां, सर्वोपद्रवशंकिनामघभृतां धिग्देहिनां जीवनम् ९२

पुनश्च वृद्धावस्थायां स्वार्थं विना स्ववल्लभास्तनयादयोऽप्यवज्ञां कुर्वन्ति, तदपि महत्कष्टमेव जनो भजति ।

उक्तञ्च-गात्रं संकुचितं गतिर्विगलिता दन्ताश्च नाशं गता, दृष्टिर्भ्रश्यति वर्द्धते बधिरता वक्त्रं च लालायते ।
वाक्यं नैव करोति बान्धवजनः पत्नी न शुश्रूषते। धिक् कष्टं जरयाभिभूतपुरुषं पुत्रोऽप्यवज्ञायते ॥९३॥

ततो भो भव्यप्राणिनः ! यूयं भवभ्रमणहेतुं मिथ्यात्वभ्रमं परित्यजत । यतः—

मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं विषम् ! मिथ्यात्वं परमं शत्रु–र्मिथ्यात्वं परमं तमः ॥ ९४ ॥
जन्मन्येकत्र दुःखाय, रोगः सर्पो रिपुर्विषम् । अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम् ॥९५॥

अतः सर्वसंपद्धेतुकं स्वर्गापवर्गमवनैककारणमिहापि सर्वसौख्यप्रदायकमेवंविधं सम्यक्त्वं भजत । यतः—

मूलं बोधिद्रुमस्यैतद्, द्वारं पुण्यपुरस्य च । पीठं निर्वाणहर्म्यस्य, निधानं सर्वसंपदाम् ॥ ९६ ॥

तथा च–गुणानामेक आधारो, रत्नानामिव सागरः। पात्रं चारित्रवित्तस्य, सम्यक्त्वं श्लाघ्यते न कैः ?॥९७॥

एवंभूतं सम्यक्त्वमङ्गीकृत्य देवगुरुधर्मान् सम्यक् सुसेव्य च शिवसुखं भवन्तः साधयन्तु । विषयविकारानपनीयाणुव्रतादीन् द्वादशव्रतानङ्गीकुरुत यत एष एव मुक्तेः शुद्धपथः । पुनर्यः प्राणी प्रेम्णा पंचमहाव्रतं परिपालयति, स तु भवान्तं विधायोत्तमां मोक्षगतिं प्राप्नोति । येन प्राणी रागद्वेषादिकर्मशत्रून्विजित्य शाश्वतीं मोक्षश्रीलीलामाप्नोति, एवं द्विविधो धर्मः पूर्वैः सुज्ञानिपुरुषोत्तमैः प्रतिपादितः । पापेन च दुःखमेव भवति, अतोऽधर्मं परित्यजत । ये खलु पापरागिणस्तेऽधमां गतिं यास्यन्ति । पुनर्ये पापिनस्ते दुःखनिलया भूत्वाऽनन्तकालं भवे भ्रमिष्यन्ति । अतएव ये भव्याः सम्यक् परीक्ष्य धर्ममाश्रयिष्यन्ति ते भवसागरतीरं लब्ध्वा शिवलक्ष्मीं

वरिष्यन्त्येव यतः प्राणिनां धर्म एव सर्वसुखखनिः, धर्मेण हि सुरसम्पदो भवन्ति । अतो धरायां सारभूतं धर्मं ज्ञात्वा यथाविधि त्वरितं तं निषेवध्वम् ।

यतः-विलम्बो नैव कर्तव्यः, आयुर्याति दिने दिने । न करोति यमः क्षान्तिं, धर्मस्य त्वरिता गतिः ॥ ९८ ॥

पुनरनेकभययुतं भोगादिकं सर्वं परित्यज्य निर्भयं परमसारभूतं वैराग्यधर्ममेव भजध्वम् ।

यतः—भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं, माने म्लानिभयं जये रिपुभयं वंशे कुयोषिद्भयम् ।
दास्ये स्वामिभयं गुणे खलभयं काये कृतान्ताद्भयं, सर्वं नाम भयं भवेदिह नृणां वैराग्यमेवाभयम् ॥९९॥

भो भव्याः! बहूक्तेन किं? परभवे सुखोपलब्धये धर्मसंबलं गृह्णन्तु, यतोऽत्रापि संबलं विना कोऽपि नरः कदापि पन्थानं नो गच्छति, तर्हि दीर्घादृष्टपरलोकमार्गस्यापि संबलं किम गृहीतव्यम्? यतो ग्रामान्तरं गच्छतः कुत्रापि पाथेयं मिलति, परत्र गन्तुस्तु नैव।

यतः—ग्रामान्तरे विहितसंबलकः प्रयाति, सर्वोऽपि लोक इह रूढिरिति प्रसिद्धा ।
मूढस्तु दीर्घपरलोकपथप्रयाणे, पाथेयमात्रमपि नैव च लात्यधन्यः ॥ २०० ॥

इति केवलिनो धर्मदेशनाश्रवणानन्तरं सर्वे सभासदः केवलिनमभिवन्द्य यथाशक्ति नियमव्रतानि च स्वीकृत्य स्वस्वस्थानं प्रति जग्मुः।

ततो राज्ञा पृष्टम्-हे भगवन्! मया पूर्वभवे किं कर्म कृतं? येन मे धर्मोऽत्र नाभीष्टो जातः, चानेन सचिवेन कीदृशं कर्म कृतं? येनेदृशी महती समृद्धिः पदे पदे प्राप्ता। ततः केवली प्राह-हे राजन्! युवयोः पूर्वभवसंबन्धिनिखिलवृत्तान्तो मया निग-

यते, अतः सावधानत्वेन श्रृणुताम्—युवां पूर्वभवे सुन्दरपुरन्दरनामानौ भ्रातरावेवाभवताम् । सुन्दरस्तु मिथ्यात्वमोहितत्वादज्ञान-
कष्टकर्ता तापसो जातस्तत्र वनस्पतिच्छेदनभेदनजलक्रीडादिदुष्कर्मणा पुनर्भृशं मिथ्यामतिसंगं प्राप्याज्ञानतपसा च सर्वाणीन्द्रियाणि
वशीचकार । अङ्गारधानिकां शुष्कगोमयं वनफलपुष्पाणि मृत्तिकां विभूतिं च प्रत्यहमुपयुज्य जटाधरोऽवधूतोऽभूत् । ऊर्ध्वबाहुस्त-
थैवाधोमुखो भूत्वाऽज्ञानतपसा पंचाग्नीन् साधयति स्म । मौनमेव सदा रक्षति स्म, पुनर्भवान् केशांश्च वर्धयति स्म, कन्दमूलानि संभक्ष्य
२ कायं कृशीकरोति स्म । षट्कायजीवान् विराधयति स्म, दया तु न कदापि हृदये धारयति स्म, शौचधर्ममहर्निशं समाद्रियते स्म ।
एवं मिथ्यात्वानुबन्धिनीं तपःक्रियां समाचरन्नायुषः क्षये मृत्वाऽज्ञानतपसोऽनुभावादयं त्वं पापबुद्धिनामा राजाऽभूः । पुनः पुरन्दरस्तु
जैनसाधुसंगत्या तदुपदेशानुसारेण जिनप्रासादं कारयितुं प्रारंभं कृतवान्, अर्द्धनिष्पन्ने च जिनप्रासादे तेनैवंविधः संशयः कृतो यन्मया
सहस्रशो द्रव्यव्ययं कृत्वा प्रासादं कारयितुं प्रारब्धमस्ति, परमेतन्निर्मापणेन मे किमपि फलं भविष्यति नवेति संशयकरणानन्तरं
पुनस्तेन चिन्तितम्—हा ! मया व्यलीकं ध्यातम्, यतो देवनिमित्तं कृतं कार्यं कदापि निष्फलं न यातीति मे प्रासादनिर्मापणफलं
भविष्यत्येवेति विचिन्त्य तेन नैर्मल्यपूर्णभावेन तं जिनप्रासादं समाप्य ततः कस्यचिद् ज्ञानवतः सद्गुरोः सन्निधौ महोत्सवपूर्वकं बहु-
द्रव्यव्ययेन सांजनशलाकां प्रतिष्ठां विधाय जिनबिम्बानि स्थापितानि । तथैवान्यमपि श्रीजैनधर्मोन्नतिजिनप्रासादबिम्बप्रतिष्ठातीर्थ-
यात्रागुरुभक्तिसाधर्मिकवात्सल्यपौषधशालानेकदीनदानादिबहुविधं धर्मं कृत्वा, ततोऽन्ते निजायुषःक्षये स पुरन्दरजीवस्तु सुखसमा-
धिना मृत्वा ते समृद्धिमान् धर्मबुद्धिनामा मन्त्री जातः, एवं येन यादृशानि कर्माणि कृतानि तेन तादृशान्येवाऽत्र फलानि प्राप्तानि ।
अथ जिनदीक्षां गृहीत्वा सत्तपस्तप्त्वा केवलज्ञानमासाद्य, हे राजन् ! अस्मिन्नेव भवे युवां मोक्षं गमिष्यथः । अतो रोगशोकादि-

दौर्भाग्याणां हर्ता भवदुःखविनाशकः परमानन्ददायकश्चैवंविधो धर्मः सदैव मोक्षार्थिप्राणिभिः सदैव कर्तव्यः ।

यतः–दीपो हन्ति तमःस्तोमं, रसो रोगमहाभरम् । सुधाबिन्दुर्विषावेगं, धर्मः पापभरं तथा ॥ १ ॥

सर्वाणि परमप्रभुतास्पदानि स्वर्गस्थानं शिवं सौभाग्यं चैतत्सर्वं भो भूपाल ! प्राणिना धर्मप्रसादेनैव लभ्यते । इत्थं केवलिनोपदिष्टं भववैराग्यजनकं स्वपूर्वभवं द्वावपि राजमन्त्रिणौ श्रुत्वा सुश्रावकद्वादशव्रतान्यंगीकृत्य तं केवलिनं सम्यक् शिरसाभिनम्य पराङ्गतौ, तदनु भव्याङ्गिनामुपकाराय [illegible] विजहार ।

अथ राजा प्रधानश्च द्वावपि केवलिसमीपे गृहीतान् द्वादशव्रतान् निरतिचारं पालयन्तौ न्यायपूर्वकं राज्यं च कुर्वन्तौ सुखेन बहुकालं गमयतः स्म । अथान्यदा कस्यचिद् ज्ञानिगुरोः सकाशे राजमंत्रिणौ सदुपदेशमुपलभ्य वैराग्यरागेण स्वात्मानमभिरज्य स्वस्वसुताय स्वस्वपदवीं समर्प्य दीक्षां गृहीत्वा ज्ञानतपस्तप्त्वा निरतिचारं चारित्रं सम्यक् परिपाल्य केवलज्ञानमासाद्य मोक्षं जग्मतुः । अतएव भो भव्यप्राणिनः ! उभयलोके जयकारि धर्मफलं ज्ञात्वा पापमतिमपनीय समनिशमेव त्रियोगेनाराधयत । मोक्षमार्गञ्च साधयत, सर्वदा शुद्धं श्रीजिनभाषितं जगज्जनतारकं दुर्गतिनिवारकं धर्मं धारयत । तेन युष्माकमपि राजमंत्रिणोरिव कर्मभ्यो मोक्षो भविष्यति, पुनर्यो धर्मकर्माणि विधत्ते तस्याऽस्मिन्नपि भवे समस्तं वांछितं भविष्यत्येव ।

यतः–आरोग्यं सौभाग्यं, धनाढ्यता नायकत्वमानन्दाः । कृतपुण्यस्य स्यादिह, सदा जयो वाञ्छितावाप्तिः ॥२॥

किं बहुना ? सर्वेषां प्राणिनां पुण्येनैव सर्वे मनोरथाः पूर्णा भवन्ति, अतो मिथ्यात्वं सांसारिकसर्वखेदञ्च परित्यज्य हृदि सन्तोषं निधाय सर्वेष्टदं पुण्यं कुरुत ।

उक्तञ्च-रम्येषु वस्तुषु मनोहरतां गतेषु, रे चित्त ! खेदमुपयासि किमत्र चित्रम् ?।

पुण्यं कुरुष्व यदि तेषु तवाऽस्ति वाञ्छा, पुण्यैर्विना नहि भवन्ति समीहितार्थाः ॥ ३ ॥

पूर्वं संकुचिता बहुत्रुटिगता या सान्यशास्त्रज्ञैः, सद्युक्त्या निजया च पूर्वरचितै रासोद्भवैर्वर्णकैः ।
संपूर्णात्र विवर्द्धिता विजयराजेन्द्रेण गच्छाधिपे-नेयं कामघटस्य भव्यजनताबोधाप्तये सत्कथा ॥४॥

दीपविजयमुनिनाऽहं, गुलाबविजयेन शिष्ययुगलेन । विज्ञप्तो व्यतानिषं, कामघटकथामिमां रम्याम् ॥५॥

॥इति पापधर्मपरीक्षायां पापबुद्धी राजा धर्मबुद्धिश्च मंत्री तत्सम्बन्धिनीयं कामघटकथा समाप्ता॥

समाप्त